वर्षम्-२ अङ्कः-५

# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५१११ वैक्रमाब्दः २०६६ आषाढशुक्ल ९ – अश्विनशुक्ल ११ शकः १९३१ जुलाई – सितम्बर २००९



तृतीयदीक्षान्तमहोत्सवे कुलाध्यक्षं मा.सं.वि. मन्त्रिणं कपिलसिब्बलवर्यं सम्मानयन् कुलपतिः रा.व. त्रिपाठी। न्यायमूर्तिः पी.एन्. भगवती, चन्दनसिंहकनियालः च दृश्येते




प्राकृतसङ्गोष्ठ्याः समापनोत्सवे राधावल्लभत्रिपाठी, अनिताभटनागरजैन, नामवरसिंहः, युगलकिशोरमिश्रः च



विद्वत्सपर्याकार्यक्रमे भाषमाणः पुल्लेलश्रीरामचन्द्रुडुः कुलपतिः राधावल्लभत्रिपाठी च

## कुलपति-वाक्

संस्कृतवार्ताया अस्य पञ्चमाङ्कस्य प्रकाशनकाले राष्ट्रियसंस्कृतसंस्थानस्य तृतीयः दीक्षान्तमहोत्सवः भव्यतया समायोजितः अभूत्। अथ च अस्मिन् एव मासे संस्थानेन "बौद्धपरम्परायाः वैश्विकः सन्देशः – पालिसाहित्यस्य विशेषसन्दर्भे" इति विषयमधिकृत्य अन्ताराष्ट्रियसङ्गोष्ठी आयोज्यते। संस्थानस्य कार्यक्रमाः सम्प्रति वृद्धिं प्रकर्षं च प्राप्ताः।

संस्थानस्य तृतीयदीक्षान्तमहोत्सवे विश्वविश्रुतविद्वद्द्वयं मानदोपाधिना विभूषयितुमवसरः संस्थानेन लब्धः। आचार्यः रामकरणशर्ममहोदयो हि संस्थानस्यास्य संस्थापकनिदेशकः संस्थानस्थापनायां तद्विकासकार्ये च विहितश्रमः महनीयः, युगकविः मेधाविनामग्रगण्यः। अप्रतिमवैदुष्येण सुपरिचितः आचार्यः एन्.एस्. रामानुजताताचार्यमहोदयस्तावत् भारतीयशास्त्रपरम्परायाः स्फूर्तिमद्विग्रहस्वरूपः। एतद्विद्वद्वरेण्यद्वयं क्रमशः विद्यावाचस्पतिः, शास्त्रकल्पद्रुमः इति मानदोपाधिना समलङ्कृतम्। सम्मानितविदुषोः संस्कृतसेवातत्परता, कर्मनिष्ठा, शास्त्रतपस्या च अस्मान् संस्कृतसेवाकर्मसु प्रेरयन्ति।

संस्थानस्यास्य अध्यापकाः स्वीययोग्यतया वैदुष्येण च देशे विशिष्यन्ते। संस्थाने कृतकार्येषु अध्यापकेषु दशाधिकाः अध्यापकाः संस्कृतवैदुष्यमुपलक्ष्य, कृतसंस्कृतसेवामुपलक्ष्य च भारतशासनेन प्रदीयमानं राष्ट्रपतिसम्मानम् अलभन्त। अस्मच्छात्रैः तिरुपतौ बेङ्गलूरुनगरे अन्यत्र वा आयोजितासु विविधासु अखिलभारतीयस्पर्धासु अनेके पुरस्काराः अर्जिताः।

२००८-०९ तमे वर्षे १४३८५ छात्राः संस्थानपरीक्षामलिखन्। गतवर्षद्वये सर्वेषु परिसरेषु व्यवस्थासौकर्यादिकं वर्धितम्। पारम्परिकशास्त्राध्येतॄणामस्माकं छात्राणां कृते सङ्गणकशिक्षा-पर्यावरणशिक्षादीनाम् समुचितव्यवस्था कृता। संस्थानस्य समृद्धपुस्तकालयानाम् अन्तर्योजनाय (Networking) कार्यमारब्धम्। इलाहाबाद-पुरी-गुरुवायूरुपरिसरेषु दुर्लभपाण्डुलिपिग्रन्थानां महान् सङ्ग्रहो वर्तते यस्य संरक्षणाय यथोचितम् अवधानं दीयते। पाण्डुलिपीनां वैद्युतीकरणम् (डिजिटाइज़ेशन्) प्रगतिपथे वर्तते। २००७तमे वर्षे विश्वविद्यालय-अनुदान-आयोगस्य समीक्षासमित्या संस्थानस्य समेषां परिसराणां निरीक्षणं कृत्वा स्वप्रतिवेदने निगदितमासीत्–"एतेषु परिसरेषु प्रशंसनीयं शैक्षणिकं कार्यं प्रवर्तते। अत्रत्याः योग्याः शिक्षकाः संस्कृते अध्ययनानुसन्धानयोः प्रगतये कटिबद्धा वर्तन्ते" इति। समीक्षासमित्या प्रमाणीकृतम् एतत् तथ्यं संरक्षितुं संवर्धयितुं च वयं सम्भूय प्रयत्नं कुर्याम। अस्मदीयाकाङ्क्षा वर्तते यत् रा.सं. संस्थानं विश्वस्य प्रतिष्ठितविश्वविद्यालयानां सूच्यां परिगणितं स्यात्। अत्रत्याः स्नातकाः समग्रजगति स्वीयप्रतिभया शास्त्रवैदुष्येण च राजन्ताम्। आशासे यत् मानवसंसाधनविकासमन्त्रालयस्य सहयोगेन, वरिष्ठविदुषां मार्गदर्शनेन, अस्मदध्यापकानां छात्राणां ज्ञानसाधनया च सङ्कल्पोऽयं चरितार्थतां प्राप्नुयादिति।

*–राधावल्लभः त्रिपाठी*





दीक्षान्तमहोत्सवे पञ्चवाद्यघोषः शोभायात्रा च

## मुख्यपरामर्शदाता

प्रो. राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## परामर्शदातृमण्डलम्

डॉ. जि. गङ्गन्ना, पुरी
प्रो. रामानुजदेवनाथः,शृङ्गेरी
प्रो. विश्वमूर्तिशास्त्री, जम्मू
प्रो. सुरेन्द्रझाः, इलाहाबादम्
प्रो. आजादमिश्रः, भोपालम्
डॉ. प्रकाशपाण्डेयः, गरली
प्रो. के.टी. माधवन्, गुरुवायूरु
सर्वनारायणझाः, लखनऊ
प्रो. अर्कनाथचौधरी, जयपुरम्
प्रो. एम्.ए. बाबुः, मुम्बई

## सम्पादकमण्डलम्

डॉ. शुक्ला मुखर्जी
डॉ. रत्नमोहनझाः
कु. वेङ्कटेशमूर्तिः

## सहयोगी

प्रफुल्लगडपालः


# संस्कृतवार्ता

राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

ISSN : 975

प्रकाशकः
**राष्ट्रियसंस्कृतसंस्थानम्**
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in


## प्रतिवार्ता




संस्थानेन प्रकाशपथमानीतायाः संस्कृतवार्तायाश्चतुर्थोऽङ्को विलोकितः पठितश्च। इह हि वर्तते किमपि विशिष्टं शब्दसौष्ठवं, भावगाम्भीर्यं संस्कृताभ्युन्नत्याधायकोल्लेखसंहतिः, घटितकार्यक्रम-सङ्ग्रहः, तदीयप्रकाशनञ्चेति, यो हि सहसैव समाकर्षति सर्वेषां चित्तम्। पठितो विद्वन्मानसप्राप्तादराणां वाग्वैभवोपलालितप्रथितयशसां वैयाकरणशिरोमणिभूतानां पण्डितेन्द्र**हिन्दकेसरि**महोदयानां वज्रपात इव दिवङ्गमनोदन्तः। संस्कृतसंसारस्य अपूर्य्यक्षतिरिति मन्ये। मुम्बय्यां गरल्यां च परिसरभवननिर्माणप्रयासोऽप्यधुना प्रवर्तते, निशम्येदं सुतरां चित्तं हर्षनिर्भरं जायते। कुलपतिवर्यस्य दैनन्दिनी-हारेण कार्यव्यस्तताऽपि व्यलोकि, ज्ञायते च तेषां संस्कृतध्वजोत्तोलनकार्ये जागरुकता कृत्स्नेऽपि भारतवलये। तदनु प्रोन्नताध्यापकानां सूचना, नवनियुक्तानामभिनन्दनं, प्रोन्नताधिकारिणां कर्मचारिणाञ्च सूचनादिकं च संस्थानोन्नतिद्योतकमिति भावयामि। विश्वसंस्कृतसम्मेलनं, दीक्षान्तसमारोहः इत्यादिभविष्यत्कार्यक्रमविवरणं, वार्षिकपरीक्षापरिणामघोषणं, छात्रवृत्तिसमाचारः संस्थानीयविदुषां क्रियावैशद्यम् इत्यादयो विषयाः सहजमेव स्वान्ततलममलं सन्तोषसुधयाऽभिसिञ्चन्ति। किञ्च-

**लोकोल्लासविकाशिकोज्ज्वलगुणा या सद्विचारव्रता**
**सर्वेषां हितबोधिका सुरुचिरा या संस्कृतोत्स्थापिका।**
**राधावल्लभपञ्चशाखनलिनद्वारेण या निर्गता**
**सा जीयादिह संस्कृतप्रणिहिता वार्ता सतां मोदिनी।।**

राजकुमारमिश्रः
प्रवक्ता, हरियाणासंस्कृतविद्यापीठतः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित- ई.मेल् सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**




संस्कृतवार्तायाः चतुर्थाङ्कस्य लोकार्पणावसरे विभिन्नसंस्कृतविश्वविद्यालयानां कुलपतयः-मोहनगुप्तः, हरेकृष्णशतपथी, जे. प्रसादः, सुधारानीपाण्डेया, सुषमा कुलश्रेष्ठः, मा.सं.वि.मन्त्रालयस्थः अवरसचिवः विनोदकुमार-अग्रवालः च।

# भव्यतया सम्पन्नः दीक्षान्तमहोत्सवः



दीक्षान्तमहोत्सवम् उद्घाटयन् कुलाध्यक्षः कपिलसिब्बलः, न्यायमूर्तिः पी.एन्.भगवती, कुलपति, राधावल्लभत्रिपाठी च।

राष्ट्रियसंस्कृतसंस्थानस्य तृतीयः दीक्षान्तमहोत्सवः १२-९-०९ दिनाङ्के नवदेहल्यां सिरीफोर्ट-प्रेक्षागृहे सम्पन्नः। सहस्राधिक-स्नातकानां, सभ्यानां च पुरतः विद्वदग्रेसरौ अवसरेऽस्मिन् मानदोपाधिना विभूषितौ अभवताम्। चतुःशास्त्रपारङ्गतः आचार्यः रामानुजताताचार्यमहोदयः 'शास्त्रकल्पद्रुमः' इति सम्मानोपाधिना, संस्थानस्य संस्थापकनिदेशकः अन्ताराष्ट्रियस्तरे ख्यतनामा आचार्यः रामकरणशर्ममहोदयः विद्यावाचस्पतिरिति च सम्मानोपाधिना संस्थानकुलाध्यक्षेण मानवसंसाधनविकासमन्त्रिणा श्री कपिलसिब्बलमहोदयेन समलङ्कृतौ। पूर्वाह्णे १०.४५ समये समागतम् अध्यक्षं सिब्बलवर्यं, दीक्षान्तभाषणकर्तारं विशिष्टातिथिं सर्वोच्चन्यायालयस्य प्रधानन्यायाधीशचरं श्रीमन्तं पी.एन्. भगवतीमहोदयं च कुलपतिप्रमुखाः प्रबन्धमण्डलसदस्याः, विद्वत्परिषदः सदस्याः च मङ्गलवाद्यसहितशोभायात्रया स्वागतीकृतवन्तः। धृतदीक्षान्तोत्तरीयानां समूहः प्रेक्षागृहे राजते स्म। वेदघोष-सरस्वतीवन्दन-ज्योतिप्रज्वालनादिमङ्गलकृत्यैः समारब्धः अयमुत्सवः मध्याह्ने सार्धद्वादशवादनं यावत् निर्विघ्नं प्राचलत्। कार्यक्रमारम्भे संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिमहोदयेन स्वागतकथनपुरस्सरं संस्थानस्य प्रतिवेदनं प्रस्तुतम्। तत्पश्चात् आ. राधावल्लभत्रिपाठिमहोदयेन सम्पादितः भगवन्तभास्करप्रणीतः म.म. पी.वी. काणेमहोदयस्य आङ्ग्लानुवादसहितः व्यवहारमयूखः, आचार्यमिथिलाप्रसादत्रिपाठिसम्पादितं श्रीमद्विश्वनाथसिंहजूदेवविरचितं श्रीराधावल्लभीयमतप्रकाशकं ब्रह्मसूत्रभाष्यम्, संस्थानेन सज्जीकृताः दृश्य-श्रव्य-सान्द्रमुद्रिकाः (वैदिकगणितम्, कविभास्करी, कथादशकं) च लोकायार्पिताः। संस्थानस्य जम्मूस्थ-श्रीरणवीरपरिसरस्य पुरुषच्छात्रावासस्य महिलाछात्रावासस्य च समुद्घाटनं इलेक्ट्रोनिकमाध्यमेन कृतम्। तदनन्तरं दीक्षान्तमहोत्सवस्य केन्द्रबिन्दुभूतं स्नातकोपस्थापनं सञ्जातम्। विद्यावारिधि-आचार्य-शिक्षाचार्य- शिक्षाशास्त्रि-शास्त्रि-स्वर्णपदक-भाजां तत्तदुपाधिप्रदानाय पुरस्कारप्रदानाय च क्रमशः उपस्थापनं



ग्रन्थलोकार्पणावसरे गोपीरमणमिश्रः, अनिताभटनागरजैन, राधावल्लभत्रिपाठी, कपिलसिब्बलः, पी.एन्.भगवती

प्राचार्यैः विश्वमूर्तिशास्त्रि-गङ्गन्न-सुरेन्द्रझा-प्रकाशपाण्डेय-के.टी. माधव-रामानुजदेवनाथमहोदयैः कृतम्। सम्मान्य-कुलपतिमहोदयः तैत्तिरीयोपनिषदः शीक्षावल्युद्धृतवचनैः स्नातकान् उपादिशत्। मानदोपाधिसम्मानितौ विद्वांसौ कुलाध्यक्षेण राङ्कव-प्रमाणपत्र-श्रीफलैः अभिनन्दितौ। पद्मविभूषणः न्यायमूर्तिः श्रीमान् पी.एन्.भगवती-महोदयः दीक्षान्तभाषणे स्नातकान् उपदिश्य, अध्यात्मशक्तिसम्भृतस्य संस्कृतस्य गुणान् बहुविधैरुदाहरणैः प्रतिपादितवान्। सम्मान्यः कुलाध्यक्षमहोदयः श्री कपिलसिब्बलः भाषमाणः जवाहरलालमहोदयेन भारतस्य भाषानीतिविषयकप्रस्तावसमये प्रकटितां संस्कृतविषयिणीं श्रद्धाम्, विलियम् जोन्स् महाभागस्य विचारान्, श्री पी.वी. काणेमहोदयेन कृतं संस्कृतसम्बन्धिविद्वत्कार्यम्, नासा (NASA)-विज्ञानिनः रिक् ब्रिक्स्-महोदयस्य संस्कृतविषयकाभिप्रायं च उदाहृत्य संस्कृतस्य महत्त्वं उद्घोषितवान्। तेन स्नातकाः सम्बोधिताः यत् 'संस्कृतविद्यातः प्राप्तानि जीवनमूल्यानि आत्मसात्कृत्य, सुगुणाः सुशीलाश्च सन्तः भव्यभारतस्य निर्माणं कुर्युः। आत्मविश्वासेन जीवने प्रगतिमवाप्नुयुः' इति। कुलपतिः कुलाध्यक्षं मन्त्रिमहोदयं, विशिष्टातिथिं दीक्षान्तभाषणकर्तारं च श्रीफलोत्तरीयादिभिः सममानयत्। कार्यक्रमेऽस्मिन् मञ्चे मा.सं.वि.मन्त्रालयस्य संयुक्तसचिवा (भाषाणां) डा. अनिताभट्नागरजैनमहोदया अपि उपस्थिता आसीत्।



विद्यावाचस्पतिरिति सम्मानोपाधिना विभूषितः रामकरणशर्मा



उपनिषद्वचनैः स्नातकान् उपदिशन् कुलपतिः



शास्त्रकल्पद्रुममेति मानदोपाधिं प्राप्नुवन् एन्.एस्.आर्. ताताचार्यः

## तृतीयदीक्षान्तमहोत्सवे कुलाध्यक्षेण दीक्षान्तभाषणकर्त्रा च प्रकटितविचाराणां केचन बिन्दवः



अध्यक्षभाषणं कुर्वन् मा.सं.वि. मन्त्री श्री कपिलसिब्बलः

पञ्चसहस्राधिकवर्षाणां सुदीर्घेतिहासे उदात्तचिन्तनानां दार्शनिकविचाराणां च प्रकटनस्य माध्यमभूता संस्कृतभाषा भारताद् बहिरपि अनेकेषु देशेषु प्रसृता अभूत्। संस्कृतं भाषा केवलं नहि, अपि तु एषा भव्यपरम्परायाः अध्ययनपणाल्याः द्योतकं चास्ते। भाषायाम् अस्यां गणित-प्रकृतिविज्ञान-जीवविज्ञान-समाजशास्त्र- कला-तन्त्रज्ञान- विज्ञानादि-ज्ञानशाखासम्बद्धाः विषयाः निहिताः सन्ति। सर् विलियं जोन्स् संस्कृतस्य अद्भुतसंरचनाशैलीं, परिनिष्ठितत्वं च मुक्तकण्ठं प्रशंसितवान्। पण्डित-जवाहरलाल-नेहरूमहोदयः भारतीय-भाषानीतिनिर्णायकसमावेशे संस्कृतमधिकृत्य इत्थं प्रतिपादितवान्-"भारतस्य श्रेष्ठसम्पत्तिः का?का च तदीयभव्यरिक्थः परम्परा च इति अहं पृष्टश्चेत् उत्तररूपेण निःसङ्कोचमिदं ब्रवीमि यत् संस्कृतभाषा तदन्तर्गतवाङ्मयजातं सर्वमपि भारतस्य उल्लेखनीया सा सम्पत्तिरिति।......" इति।

ममायम् अभिप्रायोऽस्ति यत् संस्कृतज्ञानम् अद्यतनज्ञानभण्डारम् इतोऽपि समृद्धतरं कुर्यात्। अन्यान्यभारतीयभाषाः संस्कृतात् स्फूर्तिं प्राप्नुयुः। संस्कृतपरम्परायां निहिताः सामाजिक-नैतिक-वैचारिक-मूल्यानि अस्माभिः आत्मसात्करणीयानि। संस्कृतं राष्ट्रियैकतां दृढयितुम् एकं प्रबलं साधनं भवितुमर्हति।

स्वस्थापनाकालादारभ्य रा.सं.संस्थानं संस्कृतस्य सर्वतोमुख-विकासाय विशिष्टतया प्रयत्नरतमस्तीति विज्ञाय भृशं प्रमुदितोऽस्मि।

संस्थानेन स्वीकृताः अभिनवाः योजनाः, नवोन्मेषशालिनः कार्यक्रमाः च देशे संस्कृताध्ययनं प्रोत्साहयेयुः। संस्थानेन स्वीयपाठ्यक्रमः नवीकृत इति मोदस्य विषयः। प्रतिघट्टपरीक्षापद्धतिः ऐच्छिकविषया-धारितगुणाङ्कग्रहणप्रणाली चाङ्गीकरिष्यते, नाट्यशास्त्रादिनूतनविभागाः आरप्स्यन्ते इत्यपि अभिनन्दनीयो विषयः।

कस्याश्चिदपि विद्यासंस्थायाः इतिहासे दीक्षान्तमहोत्सवदिनम् विशिष्टम् स्थानमर्हति। कतिचनवर्षाणि अत्र सम्यगधीतवन्तः छात्राः एतस्मिन् दिने समाजं प्रविशन्ति।

प्रियच्छात्राः! अहमनुरुन्धे यत् भवन्तः संस्कृतविद्याधिगमेन प्राप्तव्य-जीवनमूल्यानि आत्मसात्कृत्य गुणवन्तः सुशीलाः सद्विचारशीलाश्च सन्तः भव्यभारतस्य सुन्दरसमाजं निर्मान्तु, आत्मविश्वासेन भविष्यं रूपयन्तु।

सर्वान् स्नातकान् अभिनन्द्य मदीयं भाषणमुपसंहरामि, स्मारयामि च यदेषः अवसरः भवतां भाविजीवनस्य अत्यन्तप्रमुखभागस्य आरम्भमात्रम् यस्मिन् भागे भवद्भिः समाजस्य कृते बहु किमपि प्रदेयम्।



दीक्षान्तभाषणं कुर्वन् न्यायम् श्री पी.एन्.भगवती

विधिक्षेत्रसम्बन्धात् अहं सविशेषं स्मरामि यत् सार्थकः निर्णयः, विशेषतः हिन्दूविधेः दायभागविधानसम्बद्धनिर्णयः च संस्कृतविदुषां परामर्शेन तथा च संस्कृतग्रन्थानाम् उद्धरणानि च परिशील्य स्वीक्रियते स्म। अस्माकम् आध्यात्मिकता कर्मणः त्यागस्य अपेक्षां नैव करोति, अपितु स्वस्य अहङ्कारत्यागस्य अपेक्षां विदधाति। अनेन त्यागेन उच्चतरचेतनायाः अभिव्यक्तिः भवति। अस्यैव त्यागस्य अभिव्यक्तिः सेवाभावे भवति। अस्माभिः अहम्भावनायाः उपरि भूत्वा स्वकीयस्य आत्मनः यथार्थरूपस्य प्रकाशनं करणीयम्। अस्माकम् ऋषिभिः उक्तम्-

"न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः"

त्यागः सेवा च भारतीयसंस्कृतेः शाश्वते मूल्ये वर्तेते। आप्राचीनकालात् अनेनैव मूल्येन वयं प्रेरिताः स्मः। वयं सूक्ष्मतया अस्माकं समस्यानां मूल्याङ्कनं कुर्मश्चेत् ज्ञायेत यत् त्यागसेवाभावयोः परित्यागः एव अस्माकं समस्यानां मूलकारणम् अस्ति। इदानीन्तनयुगे अनयोः द्वयोः आदर्शयोः परिपालनं करणीयं भविष्यति। यदि अस्माकं जनाः त्यागसेवाभावनाभ्याम् युक्ताः स्युः तर्हि अस्माकं देशः महान्, विकसितः, संस्कारयुक्तः, प्रकाशमयः च भविष्यति। त्यागः सेवा च शाश्वतादर्शभूतौ स्तः। अनयोः कारणादेव इयं महती संस्कृतिः रक्षिता अभूत्। एतत् जीवनमूल्यम् अस्माकं सत्पुरुषैः महात्मभिः चरितार्थतां नीतम्। इयं संस्कृतिः शक्तिसम्पन्नैः महाराजैः धनाढ्यैः पुरुषैः वा नैव उज्जीविता अपितु इयम् आत्मज्ञानिभिः सुरक्षिता वर्तते। ईश्वरस्य, महात्मनाम्, ऋषीणां चावताराः अस्याः पावनभारतीयभूमेः सहजं फलं वर्तते। अस्मादेव कारणात् पाश्चात्त्याः ज्ञानप्रकाशं प्राप्तुम् अद्य भारतोन्मुखाः वर्तन्ते। संस्कृतसाहित्येन उदात्तविचाराः आध्यात्मिकमूल्यानि च संवर्द्धितानि सन्ति। अस्मिन् निहितं ज्ञानं समसामयिकसांसारिकसङ्कटानां समाधानाय अलं वर्तते। ज्ञानमेतद् भारतं विश्वाय प्रदातुं शक्नोति। मम अयं दृढः विश्वासः अस्ति यत् यावत् पर्यन्तम् अस्मिन् भूमण्डले आध्यात्मिकता भविष्यति, तावत् पर्यन्तं संस्कृतं जीवितभाषात्वेन स्थास्यति। संस्कृतं तादृशम् एकं वातायनम् अस्ति यत् मानवानुभवान् आकर्षति, तान् च उदात्तान् समृद्धान् च करोति। इदं वाग्देव्याः पवित्रं कायम् अस्ति। संस्कृतभाषा वाग्देवीत्वेन दिक्कालातीतं शाश्वतं सत्यं मानवानां कृते उन्मीलयति।

**साधोः परुषितस्यापि मनो नायाति विक्रियाम्।**
**नहि तापयितुं शक्यं सागराम्भस्तृणोल्कया।।**
-हितो॰ मित्र॰ ६३

# विश्वसंस्कृतसम्मेलने भारतीयविदुषां प्रातिनिध्यम्



कविसम्मेलने कवितापाठं कुर्वन् रामकरणशर्मा, वामतः राधावल्लभत्रिपाठी दक्षिणतः उपविष्टौ टोकुनागः, कुटुम्बशास्त्री च

सप्तम्बरमासस्य १ तः ५ दिनाङ्कं यावत् जापानदेशे क्योटो-विश्वविद्यालये चतुर्दशं विश्वसंस्कृतसम्मेलनं समपद्यत। सम्मेलनमिदम् अन्ताराष्ट्रियसंस्कृताध्ययनसमवायेन क्योटोविश्वविद्यालयसहयोगेन समायोजिता। सम्मेलनेऽस्मिन् ३५ देशेभ्यः समागताः ५०० प्रतिनिधयः भागमगृह्णन्। सम्मेलनाङ्गतया प्रवृत्ता शास्त्रचर्चागोष्ठी, कविसम्मेलनम्, यक्षगाननाट्यप्रस्तुतिः च भारतशासनाधीन- राष्ट्रियसंस्कृतसंस्थानेन प्रायोजिता आसीत्। संस्थानकुलपतेः आचार्यस्य राधावल्लभत्रिपाठिमहोदयेन अधिष्ठिते भारतीयप्रतिनिधिमण्डले आहत्य नवदशजनाः आसन्।

सम्मेलनस्य उद्घाटनसत्रम् ०१.०९.०९ दिनाङ्के प्रातः सार्धनववादने आरब्धमभूत्। समायोजनसमितेः अध्यक्षः आचार्यः हिरोशी-मत्सुमोटो प्रपञ्चस्य नानादिग्भ्यः समायातान् सर्वान् स्वागतवचोभिः अलङ्कृतवान्। जापानदेशे भारतीयराजदूतत्वेन कार्यरतः श्री हेमन्तकृष्णसिंहः शुभाशंसनमकरोत्। भारतशासनस्य मा.सं.वि. मन्त्रालये भाषाविषये संयुक्तसचिवपदे कार्यरता डा. अनिताभट्नागरजैनमहोदया सभां सम्बोधयन्ती संस्कृतवाङ्मयस्य समृद्धतां, आधुनिकसमाजे तदुपयोगितां च वर्णितवती। अद्यत्वे संस्कृताध्ययनाध्यापनानु-सन्धानकार्येषु प्रगतिमानेतुं भारतशासनेन कृतान् क्रियमाणान् च प्रयत्नान् विस्तरेण ज्ञापितवती। अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य अध्यक्षः वेम्पटिकुटुम्बशास्त्रिवर्यः संस्कृतस्य विश्वव्यापकतां, सर्वजनस्वीकार्यताम्, अनिवार्यतां, विश्वसंस्कृतसम्मेलनस्य उद्देश्यं च व्यवृणोत्।

उद्घाटनसत्रात् परम् एकं सामूहिकसत्रं सम्पन्नम्। अनन्तरं ५-९-०९ दिनाङ्कं यावत् अष्टसु प्रकोष्ठेषु वेद-भाषाविज्ञान-इतिहास-पुराणागम-तन्त्र-व्याकरण-काव्यनाटक-विज्ञान-दर्शनादि १५ विषयविभागेषु पृथक् पृथक् सत्राणि अभवन्।

## संस्थानप्रायोजितकार्यक्रमाः

सम्मेलनस्य द्वितीये अहनि अपराह्णे क्योटोविश्वविद्यालयस्य रङ्गशालायां संस्थानकुलपतेः राधावल्लभमहोदयस्य आध्यक्ष्ये प्रवृत्तायां सभायां डा. गजाननहेगडे यक्षगाननाट्यस्य विभिन्नपात्राणां प्रायोगिकं विवरणं प्रस्तुतवान्। संस्थानमुख्यालये कार्यरतः कू.वेङ्कटेशमूर्तिः यक्षगानशैल्या 'कौरवौरवम्' इति एकपात्राभिनयं प्रादर्शयत्।

तृतीयदिने (३-९-०९) शास्त्रचर्चागोष्ठी प्रवृत्ता। अत्र बहुभ्यः प्रदेशेभ्यः समागताः विद्वांसः साहित्य-न्याय-वेदान्तशास्त्रविषयेषु गभीरतया पारम्परिकशैल्या चर्चामकुर्वन्। चर्चायाः प्रधानांशः आसीत्-न्यायशास्त्रस्य शास्त्रान्तरैः सम्बन्धः इति। आचार्यरामकरणशर्ममहोदयस्य, आचार्यशिवजी-उपाध्यायमहोदयस्य राधावल्लभत्रिपाठिमहोदयस्य च समुपस्थितौ प्रवृत्तेयं गोष्ठी वाराणसेय-सम्पूर्णानन्दसंस्कृत- विश्वविद्यालयस्य कुलपतिना आचार्येण वेम्पटिकुटुम्बशास्त्रिमहोदयेन समचाल्यत।

चतुर्थे दिने (४-९-०९) अपराह्णे कविसम्मेलनमभूत् यत्र कवयः मधुरमञ्जुलसंस्कृतकविताभिः सभ्यान् सहृदयान् रञ्जितवन्तः। कविगोष्ठीमिमां संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः समचालयत्। कविभिः प्रस्तुताः विश्वबन्धुत्वप्रेरिकाः, भारतगौरवसमेधयित्र्यः, सद्भावनासञ्चोदिकाः, समसामयिक्यः च कविताः नानादेशसमागतैः सहृदयैः आस्वाद्यन्त।



वि.सं. सम्मेलनमञ्चे संस्थानेन प्रकाशितां 'कविभास्करीं' लोकायार्पयन्तः कुटुम्बशास्त्री, अनिताभटनागरजैन, रामकरणशर्मा, राधावल्लभत्रिपाठी च




शास्त्रचर्चासदसि उपस्थितः शिवजी-उपाध्यायः, राधावल्लभत्रिपाठी

# चतुर्दशे विश्वसंस्कृतसम्मेलने समुपस्थितं भारतीयं प्रतिनिधिमण्डलम्





**मन्त्रालयप्रतिनिधी**

१. डा. अनिता भट्नागरजैन (देहली)

२. श्री एस्. मोहन् (देहली)

**विद्वत्प्रतिनिधयः**

आचार्यः राधावल्लभत्रिपाठी (देहली)

आचार्या वेदकुमारी घय् (जम्मू)

आचार्यः शिवजी उपाध्यायः (उ.प्र.)

आचार्यः सुरेन्द्रमोहनमिश्रः (हरियाणा)

आचार्यः कामताप्रसादत्रिपाठी (छत्तीसगढम्)

डा. हर्षदेवमाधवः (गुजरातम्)

डा. जनार्दनप्रसादपाण्डे मणिः (उ.प्र.)

डा. शुक्लामुखर्जी (देहली)

कू. वेङ्कटेशमूर्तिः (देहली)

आचार्यः वेम्पटि-कुटुम्बशास्त्री (उ.प्र.)

आचार्यः हरेकृष्णशतपथी (आ.प्र.)

डा. हरिराम आचार्यः (राजस्थानम्)

आचार्यः मुरलीमाधवः (केरलम्)

आचार्यः प्रफुल्लकुमारमिश्रः (उत्कलम्)

डा. एस् रेवती (तमिलनाडु)

डा. गजाननहेगडे (कर्णाटकम्)

यु. श्रीकृष्णः (कर्णाटकम्)

## पञ्चदशं विश्वसंस्कृतसम्मेलनं भारते भविता

पञ्चदशं विश्वसंस्कृतसम्मेलनं २०१२ वर्षे जनवरीमासे ५तः १० दिनाङ्कं यावत् राष्ट्रियसंस्कृतसंस्थानेन अन्ताराष्ट्रियसंस्कृत-विद्यासमवाय-(I.A.S.S.)-सहयोगेन नवदेहल्याम् आयोजयिष्यते। इयं घोषणा चतुर्दशविश्वसंस्कृतसम्मेलनस्य समापनसत्रे अन्ताराष्ट्रियसंस्कृत-विद्यासमवायस्य महासचिवेन आचार्येण जे.एल्. ब्राकिङ्गटन्महोदयेन कृता।



'कौरवौरवम्' – यक्षगानशैल्या एकपात्राभिनयं प्रदर्शयन् वेङ्कटेशमूर्तिः।



यक्षगाननाट्यभङ्गिमां प्रदर्शयन् कण्ववेषधारी गजाननहेगडे

## अभिनन्दनसङ्गोष्ठी सम्पन्ना

चतुर्दशविश्वसंस्कृतसम्मेलने भागग्रहणं कृत्वा ६-९-०९ दिनाङ्के प्रतिनिवृत्तानां भारतीयप्रतिनिधीनाम् अभिनन्दनाय नवदेहलीस्थया देववाणीपरिषदा संस्थानमुख्यालये 'वि.सं.सम्मेलनसहभागिस्वागत-सङ्गोष्ठी' आयोजिता। आचार्य-रामकरणशर्ममहोदयस्य आध्यक्ष्ये, आचार्यराधावल्लभत्रिपाठिमहोदयस्य मुख्यातिथित्वे च सम्पन्ने अस्मिन् कार्यक्रमे सम्मेलनभागग्राहिणाम् अनुभवकथनम्, काव्यपाठः च अभवत्। कार्यक्रमोऽयं देववाणीपरिषन्महासचिवेन डा. रमाकान्तशुक्लमहाभागेन संयोजिता आसीत्। उल्लेखनीयमिदमस्ति यत् देववाणीपरिषदा विश्वसंस्कृतसम्मेलने भागग्रहणाय प्रतिनिधीनां प्रस्थानात् पूर्वं शुभकामनात्मकः सौप्रस्थानिककार्यक्रमोऽपि आयोजितः आसीत्।

# कुलपतेः दैनन्दिनी

| | |
|---|---|
| १-०७-०९ | नवदेहल्यां श्री ला.ब.शा.रा.सं.विद्यापीठे स्थायिसमितेः उपवेशने उपस्थितिः। |
| ३-०७-०९ | राष्ट्रपतिपुरस्कारार्हाणां चयनसमितिसमावेशे भागग्रहणम्। |
| १४-०७-०९ | सितम्बरमासे सम्पत्स्यमान-पालिविषयकान्ताराष्ट्रियसङ्गोष्ठीमार्गदर्शनसमितेः उपवेशने अध्यक्षता। |
| १६-०७-०९ | गुजरातस्थ-सोमनाथसंस्कृतविश्वविद्यालयस्य दीक्षान्तमहोत्सवे सम्मान्यातिथित्वम्। |
| २३-०७-०९ | संस्थानमुख्यालये अनौपचारिकसंस्कृतशिक्षणस्य प्रान्तीयसंयोजकानाम् उपवेशने अध्यक्षता। |
| २५तः २७-०७-०९ | जयपुरे रा.सं.संस्थानेन समायोजितायां राष्ट्रियप्राकृतसङ्गोष्ठ्यां उद्घाटनसत्रे अध्यक्षता, २६ दिनाङ्के शोधपत्रसमर्पणम्, समापनसत्रे विशिष्टभाषणं च। |
| २९-०७-०९ | विश्वसंस्कृतसम्मेलनसम्बन्धिन्यां चिन्तनगोष्ठ्याम् उपस्थितिः। |
| १-०८-०९ | श्री रामचन्द्रबुदिहालेन संस्थानमुख्यालये कृतस्य 'ई-विषयसञ्चयकोषसंवर्धनाय' सज्जीक्रियमाण-सङ्गणकीयव्यवस्था-सम्बद्धप्रदर्शनस्य परिशीलनम्। |
| २-०८-०९ | संस्थानमुख्यालये संस्कृतसप्ताहमहोत्सवस्य उद्घाटनसत्रे आध्यक्ष्यम्। |
| ४-०८-०९ | मुख्यालये संस्कृतविश्वविद्यालयकुलपतीनां सम्मेलने आध्यक्ष्यम्। |
| ५-०८-०९ | नवदेहल्यां फिक्कीप्रेक्षागृहे संस्कृतदिवसमहोत्सवः आयोजितः। |
| ८-०८-०९ | संस्थानमुख्यालये संस्कृतसप्ताहस्य समापनसत्रे अध्यक्षता। |
| १०-०८-०९ | देहल्यां टागोरगार्डनस्थित-केन्द्रीयविद्यालयस्य प्रबन्धमण्डलस्य उपवेशने अध्यक्षता। |
| ११-०८-०९ | संयुक्तसचिवायाः (भाषा) अध्यक्षतायां संस्थानमुख्यालये प्रवृत्ते अनुदानसमितेः उपवेशने भागग्रहणम्। |
| १२-०८-०९ | श्री ला.ब.शा.रा.सं. विद्यापीठे प्रवृत्तस्य, उज्जयिनीस्थ-महर्षिसान्दीपनी-वेदविद्याप्रतिष्ठानस्य प्रबन्धनपरिषदः, वित्तसमितेः च समावेशे उपस्थितिः। |
| १६-०८-०९ | दिल्ली-संस्कृत-अकादम्या आयोजिते कविसम्मेलने विशिष्टातिथित्वम्। |
| १७-०८-०९ | हैदराबादस्थित-संस्कृतपरिषदा संयोजितायाः संस्थानेन प्रायोजितायाः 'पाण्डुलिपिविज्ञान- अनुसन्धानप्रविधिविषययोः राष्ट्रियकार्यशालायाः' उद्घाटनसत्रे विशिष्टभाषणम्। |
| २२-०८-०९ | मद्रासविश्वविद्यालयस्य संस्कृतविभागेन आयोजिते वि.राघवन्-स्मृतिव्याख्यानकार्यक्रमे आध्यक्ष्यम्। |
| २२-०८-०९ | मैलापुरे डा. राघवन्-नाम्ना प्रतिष्ठितेन प्रायोगिककलाकेन्द्रेन आयोजितकार्यक्रमे अध्यक्षता। |
| १तः ५-०९-०९ | जापानदेशे क्योटोविश्वविद्यालये प्रवृत्ते विश्वसंस्कृतसम्मेलने भारतीयप्रतिनिधिमण्डलेन सह उपस्थितिः, तत्र कविसम्मेलनस्य सञ्चालनम्, रा.सं.संस्थानेन प्रस्तुतस्य संस्कृतयक्षगानैकपात्राभिनयस्य अध्यक्षता, सम्मेलनान्तर्गत-नाटकविषयकसत्रे शोधपत्रप्रस्तुतिः, शास्त्रचर्चासदसि साहित्यशास्त्रविषयकं व्याख्यानं च। |
| ११-०९-०९ | संस्थानमुख्यालये प्रबन्धमण्डलस्य विद्वत्परिषदः वित्तसमितेश्च उपवेशने आध्यक्ष्यम्। |
| १२-०९-०९ | नवदेहल्यां सिरिफोर्ट-प्रेक्षागृहे रा.सं.संस्थानस्य तृतीयदीक्षान्तमहोत्सवस्य आयोजनम्। |
| १४, १५-०९-०९ | पुर्यां म.म.पं.हरिहरमहापात्र दे.पुरोहितस्मृतिन्यासेन आयोजितायां सङ्गोष्ठ्याम् उद्घाटन- समापनसत्रयोः आध्यक्ष्यम्। |
| १६, १७-०९-०९ | विश्वविद्यालय-अनुदान-आयोगस्य (U.G.C) निरीक्षणसमितेः द्वारा निरीक्षणकार्यायोजनम्। |
| २२तः २४-०९-०९ | 'बौद्धधर्मस्य सार्वभौमः सन्देशः-पालिसाहित्यसन्दर्भे' इति विषयमधिकृत्य नवदेहल्यां विज्ञानभवने अन्ताराष्ट्रियसङ्गोष्ठीसमायोजनम्। |

## सम्पन्नः संस्कृतसप्ताहमहोत्सवः



संस्कृतदिवसे संक्षेपरामायणस्य दृश्यश्रव्यसान्द्रमुद्रिकां लोकायार्पयन्तः राधावल्लभत्रिपाठी, वाचस्पत्युपाध्यायः, कुटुम्बशास्त्री रमारञ्जनमुखर्जी, वा.रा. पञ्चमुखी च

ऐषमः संस्कृतसप्ताहोत्सवः २-८-२००९ तः ८-८-२००९ पर्यन्तं राष्ट्रियसंस्कृतसंस्थानेन विभिन्नराज्यस्थितेषु स्वीयपरिसरेषु नवदेहल्यां मुख्यालये च समनुष्ठितः। श्रावणपूर्णिमादिनं केन्द्रीकृत्य ततः पूर्वं परं च कतिचनदिनानि संस्कृतसप्ताहः बहुत्र बह्वीभिः संस्थाभिः आयोज्यत इति विदितमेव समेषाम्। नवदेहल्यां तु संस्कृतसप्ताहस्य केन्द्रबिन्दुभूतः 'संस्कृतदिवसः' ०५-८-२००९ दिनाङ्के मानवसंसाधनविकासमन्त्रालयस्य, राष्ट्रियसंस्कृतसंस्थानस्य, श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य च संयुक्ततत्त्वावधाने सम्पन्नः। अस्मिन् कार्यक्रमे बहूनां संस्कृतविश्वविद्यालयानां कुलपतयः, द्वौ कुलाधिपतिचरौ च एकत्र मञ्चे समवेताः आसन्। एतद् अभूतपूर्वं वैशिष्ट्यमासीत् ऐषमः संस्कृतदिवसोत्सवस्य। फिक्की-प्रेक्षागृहे अपराह्णे श्री ला.ब.शा.रा.सं.विद्यापीठच्छात्रैः कृतेन मङ्गलाचरणेन समारब्धे कार्यक्रमे संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः आदरकुसुमसम्भरिताभिः वाग्भिः स्वागतं व्याहरत्। आधारवक्तव्यं प्रकटयता श्री ला.ब.शा.रा.सं.विद्यापीठस्य कुलपतिना आचार्येण वाचस्पति-उपाध्यायमहोदयेन श्रावणपूर्णिमायाः, संस्कृतदिवसाचरणस्य च महत्त्वम् उद्देश्यं च प्रतिपाद्य संस्कृतोन्नतये संस्कृतज्ञैः अनुष्ठेयानि कर्माणि समस्मारि। कार्यक्रमस्य आध्यक्ष्यं तिरुपतिस्थ-रा.सं.विश्वविद्यालयस्य भूतपूर्वकुलाधिपतिः आचार्यः रमारञ्जनमुखर्जीमहोदयः व्यभूषयत्। स्वीयाध्यक्षीयवक्तव्ये सः संस्कृतवाङ्मयस्य, संस्कृतकवीनां च अनितरसाधारणं वैशिष्ट्यं सोदाहरणं प्रत्यपादयत्। संस्कृतज्ञैः नूतनरचनाभिः अनुसन्धानेन परिचिन्तनेन च संस्कृतवाङ्मयस्य परिसम्पुष्टिः विधेयः, ज्ञानशाखानां संवर्धनं च करणीयम् इति अभिप्रायः तेन प्रकटितः। सन्दर्भेऽस्मिन् समुपस्थिताः विभिन्नसंस्कृतविश्वविद्यालयानां कुलपतयः आचार्याः– सुधारानी पाण्डेया (उत्तराखण्डः), जे. प्रसादः (कालटी), सुषमा कुलश्रेष्ठा (पुरी), मोहनगुप्तः (उज्जैन) - इत्येते संस्कृतविकासं अभिलषन्तः तदर्थं करणीयकार्येषु स्वीयप्रतिबद्धतां प्राकटयन्। मुख्यातिथिपदं विभूषयता सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिना आचार्येण वेम्पटि- कुटुम्बशास्त्रिवर्येण संस्कृतश्रीवृद्धये संस्कृतसंस्थाभिः अनुसर्तुं शक्याः विविधाः उपायाः सभायाम् उपस्थापिताः। तिरुपतिस्थ-रा.सं.वि.स्य कुलाधिपतिचरः, आचार्यः वादिराजपञ्चमुखिमहोदयः 'संस्कृतज्ञैः संस्कृतेन व्यवहरणीयम्, अप्रकाशितानां हस्तलिखितग्रन्थानां प्रकाशनविषये श्रद्धा धारणीया, आधुनिकतन्त्रज्ञान-सञ्चार-माध्यमानामुपयोगेन संस्कृताध्ययनाध्यापनक्षेत्रे स्फूर्तिरानेतव्या, संस्कृतस्य व्यापकता वर्धनीया' इति च आशयं व्यक्तीकृतवान्।

सन्दर्भेऽस्मिन् रा.सं.संस्थानेन, श्री ला.ब.शा.रा.सं. विद्यापीठेन च प्रकाशिताः बहवः ग्रन्थाः लोकायार्पिताः। कार्यक्रमे समुपस्थितः मा.सं.वि. मन्त्रालये अवरसचिवत्वेन कार्यरतः श्रीमान् विनोदकुमार-अग्रवालः धन्यवादज्ञापनमकरोत्। राष्ट्रगानेन सम्पन्नः अयं कार्यक्रमः सर्वेषां मनस्सु संस्कृतविषयकं श्रद्धाभावम् अजागरयत्।

संस्कृतसप्ताहाङ्गतया संस्थानमुख्यालयेन विद्वत्सपर्या, शास्त्रचर्चा, कविसपर्या, संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलनम्, छात्राणां कृते स्पर्धाः च आयोजिता आसन्। सप्ताहव्यापिनः कार्यक्रमस्य समुद्घाटनं २-८-०९ दिनाङ्के तिरुपतिस्थ- राष्ट्रियसंस्कृतविद्यापीठस्य भूतपूर्वकुलपतिना आचार्य-प्रह्लादाचार्यवर्येण कृतम्। सभाध्यक्ष्यं निर्वहता संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिमहोदयेन संस्कृतसप्ताहे सङ्कल्पितानां पूर्ववर्षापेक्षया विलक्षणतया अयोज्यमानानां विविधकार्यक्रमाणाम् उद्देश्यं स्वरूपं च विवृतम्।




विद्वत्सपर्याकार्यक्रमे उपस्थिताः विद्वांसः। सि. राजेन्द्रन्, प्रह्लादाचार्यः, पि.रामचन्द्रुडुः, रा.व. त्रिपाठी, राजेन्द्रमिश्रः, शशिरेखा, शशिप्रभाकुमारः च।

### विद्वत्सपर्या

उद्घाटनसमनन्तरं विद्वत्सपर्याकार्यक्रमः प्रवृत्तः यत्र संस्कृतवाङ्मये कृतभूरिपरिश्रमस्य अनेकग्रन्थप्रणेतुः आचार्यस्य पुल्लेल-श्रीरामचन्द्रुडुमहोदयस्य सम्मानपुरस्सरं तस्य व्यक्तित्वं, कृतिजातं च अधिकृत्य विभिन्नप्रदेशेभ्यः समायाताः विद्वांसः स्वीयान् विचारान् प्रकटीकृतवन्तः। तत्रादौ भाषमाणा ज.नेहरुविश्वविद्यालये विशिष्टसंस्कृताध्ययनकेन्द्रे आचार्यपदे कार्यरता श्रीमती शशिप्रभाकुमारमहोदया रामचन्द्रुडुमहोदयेन प्रणीतं पाश्चात्यतत्त्वशास्त्रेतिहासनामानं ग्रन्थं 'पाश्चात्यदर्शनस्य विश्वकोशः' इति वर्णितवती। सा अब्रवीत् यत् तस्मिन् ग्रन्थे ग्रन्थकारेण अचर्चितं पाश्चात्यदार्शनिकनाम नास्त्यपरम् इति। रामचन्द्रुडुमहोदयस्य विषयविवेचनकुशलतां विवृण्वती सा 'पाश्चात्याः तत्त्ववादिनः, भारतीयाः तत्त्ववेदिनः' इति रामचन्द्रुडुमहोदयेन स्वीयग्रन्थे प्रतिपादितम् अभिप्रायं विशदीकृतवती। कालिकट्विश्वविद्यालयस्य आचार्यः सी.राजेन्द्रन्महोदयः कालिदासस्य 'शिलष्टा क्रिया कस्यचिदात्मसंस्था, सङ्क्रान्तिरन्यस्य विशेषयुक्ता। यस्योभयं साधु------' इत्यादि-सूक्तिमुदाहृत्य रामचन्द्रुडुमहोदयस्य रचनाशैल्याः प्रशंसामकरोत्। हैदराबादतः समागता विदुषी आचार्या शशिरेखा रामचन्द्रुडुमहोदयेन रचितं भारतीयमेधाविनां परिचयात्मकं 'वैज्ञानिकषाण्मुखम्' इति ग्रन्थमधिकृत्य भाषमाणा ग्रन्थकर्तुः वैशिष्ट्यं परिचायितवती।




शास्त्रचर्चासदसि उपस्थिताः
शशिप्रभा कुमारः, गोविन्दपाटीलः, पीयूषकान्तदीक्षितः,
प्रह्लादाचार्यः, राधावल्लभत्रिपाठी, अम्बिकादत्तशर्मा राजारामशुक्लः च।

तिरुपतितः समागतः विद्वान् आचार्यः जि.एस्.आर्.कृष्णमूर्तिः रामचन्द्रुडुमहोदयस्य रचनावैशिष्ट्यं, विद्याप्रेम, शिष्यवात्सल्यं, मृदुस्वभावं च विविधैरुदाहरणैः प्रास्तौत्। मुख्यातिथिः आचार्यः प्रह्लादाचार्यः रामचन्द्रुडुमहोदयस्य वैदुष्यप्रकर्षं निरूप्य तम् एतस्य समयस्य परममेधाविषु अन्यतमत्वेन प्रत्यपादयत्। अध्यक्षपदमलङ्कुर्वन् कुलपतिः 'विश्वविश्रुतकीर्तेः रामचन्द्रुडुमहोदयस्य सपर्यया संस्थानमात्मानं धन्यं मनुते' इति विद्वन्मणिं प्रति आदरभावसमन्वितानि वाक्कुसुमानि समार्पयत्।

### शास्त्रचर्चा

२-८-०९ दिनाङ्के अपराह्णे प्रवृत्त-शास्त्रसदसि 'प्राच्यप्रतीच्य-परम्परासु संशयवादः' इति विषयमधिकृत्य चर्चा प्रवृत्ता। महनीयाः विद्वांसः आचार्याः – प्रह्लादाचार्यः, गोदावरीशमिश्रः, प्रदीपगोखले, पीयूषकान्तदीक्षितः, अम्बिकादत्तशर्मा, राजारामशुक्लः, गोविन्ददेवदत्तपाटीलः–इत्येते संशयवादविषये विश्लेषणात्मकं विचारमुपस्थाप्य चर्चायां भागमगृह्णन्। आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्य अध्यक्षतायां प्रवृत्ते अस्मिन् कार्यक्रमे काशीहिन्दूविश्वविद्यालयस्य आचार्यः राजारामशुक्लमहोदयः विचारणीयविषयप्रस्तावपुरस्सरं चर्चां प्रवर्तितवान्।



हर्षदेवमाधवं सम्मानयन्, कुलपतिः, रा.व. त्रिपाठी

### कविसपर्या

कविसपर्याकार्यक्रमः ०३-०८-०९ दिनाङ्के पूर्वाह्णे मुख्यालयसभागारे सम्पन्ना। तत्र संस्कृतकविताप्रणयनपरम्परायाम् अभिनवप्रयोगान् सफलतया कृतवतः डा. हर्षदेवमाधवस्य कृतीः अधिकृत्य विद्वद्भिः कविभिः विचाराः प्रस्तुताः। सत्करणीय-कविवर्यस्य विषये अभिप्रायं प्रकटयन् आचार्यः अभिराजराजेन्द्रमिश्रः उक्तवान् यत् 'हर्षदेवमाधवस्य कवितासु शीर्षकाणां नवीनता, कथ्यस्य नावीन्यं च दृश्यते इति। संस्कृतकवितापरम्परायाः नवीनं प्रस्थानं एतेन महोदयेनारब्धम्, संस्कृतकवितानां वैश्वीकरणसम्प्रदायस्य आरम्भकर्ता एषः इति वक्तुं शक्यम् इत्यपि राजेन्द्रमिश्रवर्येण अभिप्रेतम्। आचार्यः बजरङ्गबिहारीतिवारीमहोदयः हर्षदेवमाधवमहोदयस्य 'मूको रामगिरिर्भूत्वा' इति कृतिमधिकृत्य विमृष्टं विचारं प्रकटितवान्। आचार्यः महाराजदीनपाण्डेयमहोदयः हर्षदेवमहोदयस्य 'भावस्थिराणि जननान्तरसौहृदानि' इति कृतिमधिकृत्य स्वीयाभिप्रायं प्रस्तुवन् अवदत् यत् इतिहासे याः अवाञ्छिताः अनिष्टाः वा घटनाः सञ्जाताः तद्विषये कविः तर्जनीं निर्दिशति इति। श्रीमान् अष्टभुजाशुक्लमहोदयः हर्षदेवविरचितां 'शब्दानां निर्मक्षिकेषु ध्वंसावशेषेषु' इतीमां कविताम् अधिकृत्य स्वविचारं प्रतिपादितवान्। अभिनन्दनवचनानां प्रत्युत्तरं कथयन् कविः हर्षदेवमाधवमहोदयः 'भगवत्याः पराम्बायाः कृपया यत्किञ्चिदधिगतं तत् मया कवितामाध्यमेन समर्पितम्' इति विनयेनावदत्। सभाध्यक्षेण संस्थानकुलपतिना प्रोक्तं यत् संस्कृतस्य नव्येषु कविषु विशिष्टः हर्षदेवमाधवः' इति। सामान्यतया जनैरनुमातुमशक्या आकस्मिकप्रत्यवभासरूपा सरस्वती तदीयकवितासु लक्ष्यते इत्यपि कुलपतिना अभिवर्णितम्।




संस्कृतसप्ताहस्य समापनकार्यक्रमे भाषमाणा सुषमा कुलश्रेष्ठा।
चित्रे राधावल्लभत्रिपाठी, चन्दनसिंहकनियालः,
रमाकान्तशुक्लः, शुक्लामुखर्जी च दृश्यन्ते।




पुरस्कारभाजः हरिवल्लभभारद्वाजस्य
मुखात् महिषासुरमर्दिनीस्तोत्रं शृण्वन्तः – गापीरमणमिश्रः,
सुषमाकुलश्रेष्ठः, रा.व. त्रिपाठी च।

# सञ्जीक्रियते रणनीतिः संस्कृतविकासाय

## –संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलने कुलपतिभिः उद्घोषितः सङ्कल्पः

संस्कृतसप्ताहमहोत्सवावसरे ०४-८-०९ दिनाङ्के रा.सं.संस्थानस्य मुख्यालये सम्पन्नं संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलनम्। संस्थानकुलपतिना आचार्येण राधावल्लभत्रिपाठिवर्येण संयोजिते अस्मिन् कार्यक्रमे अध्यक्षरूपेण तिरुपतिस्थ-रा.सं. विश्वविद्यालयस्य कुलाधिपतिचरः आचार्यः रमारञ्जनमुखर्जीमहोदयः, मुख्यातिथिरूपेण अर्थशास्त्रवेत्ता तिरुपतिस्थ-रा.सं.विश्वविद्यालयस्य भूतपूर्वः कुलाधिपतिः आचार्यः वादिराजपञ्चमुखिमहोदयः च समुपस्थितावास्ताम्। देशस्य विभिन्नस्थानेषु प्रतिष्ठापितानां ११ संस्कृतविश्वविद्यालयानां कुलपतयः इमे परिचर्चासत्रे भागमगृह्णन्–




संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलने विषयमुपस्थापयन् संस्थानकुलपतिः

आचार्यः वाचस्पति-उपाध्यायः, ला.ब.शा.रा.सं.वि. नवदेहली

आचार्यः वेम्पटि-कुटुम्बशास्त्री, सम्पू.सं.विश्वविद्यालयः, वाराणसी

आचार्यः पङ्कजचान्दे, कविकुलगुरुकालिदास सं.वि.वि. रामटेक्

आचार्यः हरेकृष्णशतपथी, रा.सं.वि. तिरुपतिः

आचार्या सुषमा कुलश्रेष्ठः, जगन्नाथ-सं.विश्वविद्यालयः, पुरी

आचार्यः युगलकिशोरमिश्रः, ज.रा.रा.ज.सं.वि.वि., जयपुरम्

आचार्यः जे. प्रसादः, श्रीशङ्कराचार्य-सं.वि.वि. कालटी

आचार्यः पि.एल्. जानिः, सोमनाथ-सं.वि.वि. गुजरात्

आचार्या सुधारानी पाण्डेया, उत्तराञ्चल-सं.वि.वि. हरिद्वारम्

आचार्यः मोहनगुप्तः, म.पाणिनि-सं.वि.वि. उज्जयिनी

आचार्यः राधावल्लभत्रिपाठी, रा.सं.संस्थानम्, नवदेहली

पूर्वाह्णे परिचर्चासत्रे सर्वेऽप्येते विद्वांसः संस्कृतशिक्षणस्य साम्प्रतिकीं स्थितिमधिकृत्य दृष्टिं प्रसार्य तत्र संस्कृतशिक्षणस्य गुणस्तरवर्धनाय संस्कृतविश्वविद्यालयैः विशेषतः प्रयतनीयम् इति अभिप्रायं प्राकटयन्। संस्कृताभ्युन्नतिकार्ये सम्प्रत्यनुभूयमानक्लेशानां परिहाराय समाश्रयणीयानाम् उपायानां विषयेऽपि विस्तरेण चर्चा प्रवृत्ता। संस्कृतवाङ्मयान्तर्गतानां विविधज्ञानशाखानां संवर्धनाय, अध्ययनानुसन्धानादिषु विशिष्टस्फूर्त्याधानाय च उपायविशेषाः चिन्तनीया इत्यभिप्रायः एककण्ठेन अङ्गीकृतः। सार्वजनीनस्तरे, शासकीयस्तरे च संस्कृतविकासकार्यानुकूल्यं सम्पादयितुमपि रणनीतिः आरचनीया, तदर्थं च संस्कृतविश्वविद्यालयाः सम्भूय प्रयासं कुर्युरिति विषयेऽपि सहमतिः सर्वेषां सञ्जाता।

अपराह्णसत्रे, भविष्ये करणीयकार्याणां प्रायोगिकपक्षमवलम्ब्य चिन्तनं प्रवृत्तम्। सङ्कल्पानां साकारीकरणाय सोपानक्रमेण अनुष्ठेयानां कर्मणां विषये दृष्टिः प्रसारिता। अधोनिर्दिष्टाः प्रस्तावाश्च पारिताः–

- विश्वविद्यालय-अनुदान-आयोगस्य निर्देशानुसारं सर्वेऽपि संस्कृतविश्वविद्यालयाः अध्ययनप्रणाल्याम् 'ऐच्छिक-विषयचयनाधारितगुणाङ्कग्रहण' व्यवस्थां (choise based credit system) अङ्गीकुर्युः।
- प्रत्येकं संस्कृतविश्वविद्यालयः स्वपाठ्यक्रमं यथोचितं परिशील्य अपेक्षानुसारं नवीकुर्यात्।
- संस्कृतसम्बद्धानां, संस्कृतविश्वविद्यालयसम्बद्धानां च विशिष्टक्रियाकलापानाम् उपलब्धीनां समीक्षणाय, सहकाराणाम् आदानप्रदानाय च संस्कृतविश्वविद्यालयानां कुलपतीनां सम्मेलनं प्रतिवर्षम् आयोज्येत।
- प्रत्येकं संस्कृतविश्वविद्यालयः स्वस्वक्षेत्रे/राज्ये विद्यमान-विद्यालयेषु पाठशालासु वा संस्कृतशिक्षणस्य स्थितिगतीनां समीक्षणाय उपसमितिं घटयेत्।
- १९५६-५७ वर्षे भारतशासनेन घटितस्य संस्कृतायोगस्य प्रतिवेदनस्य समीक्षणाय अधोनिर्दिष्टानाम् उपसमितिः रचिता–
  - आचार्यः वाचस्पति-उपाध्यायः
  - आचार्यः वेम्पटि-कुटुम्बशास्त्री
  - आचार्यः राधावल्लभत्रिपाठी

  समीक्षणस्य प्रतिवेदनं केन्द्रीय-मानवसंसाधन-विकासमन्त्रालये समर्प्येत।
- 'विद्यालयेषु संस्कृतस्य स्थितिः' इति विषयमधिकृत्य पर्यालोचनाय 'राष्ट्रिय-शैक्षणिक-अनुसन्धान एवं प्रशिक्षणपरिषद्' (N.C.E.R.T) इत्यादिसंस्थानां सहयोगं स्वीकृत्य राष्ट्रियसंस्कृतसंस्थानेन सम्मेलनमेकम् आयोजनीयम्।

## अन्ताराष्ट्रियसंस्कृतविद्यासमवायस्य परामर्शदातृसमितिसदस्यत्वेन चितः अस्मत्कुलपतिः

रा.सं.संस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी अन्ताराष्ट्रियसंस्कृतविद्यासमवायस्य (I.A.S.S) परामर्शदातृसमिति-सदस्यत्वेन सर्वसम्मत्या अङ्गीकृतः। इयं घोषणा जापानदेशे प्रवृत्तस्य चतुर्दश-विश्वसंस्कृतसम्मेलनस्य समापनसत्रे अन्ताराष्ट्रियसंस्कृतविद्यासमवायस्य महासचिवेन जे.एल्. ब्राकिङ्गटन्महाशयेन विहिता।

## पुरस्काराभ्याम् अलङ्कृतः कुलपतिः

- २२-६-०९ दिनाङ्के भुवनेश्वरे लोकभाषाप्रचारसमित्या इदम्प्रथमतया प्रदत्तेन **जयदेवसरस्वतीसम्मानेन** कुलपतिः राधावल्लभमहोदयः पुरस्कृतः।
- २१-८-०९ दिनाङ्के नवदेहल्यां हेल्प्फुलसोसाइटीनामिकया संस्थया **राजीवगान्धी-सद्भावना-पुरस्कारेण** संस्थानकुलपतिः आचार्यराधावल्लभत्रिपाठिमहोदयः सम्मानितः।

विभिन्नोपलब्धिभाजं संस्थानपरिवारप्रमुखं कुलपतिमहोदयम् अभिनन्दन्ति संस्थानपरिवारसदस्याः।

## २००९ वर्षस्य राष्ट्रपतिपुरस्काराय घोषिताः

### संस्कृतविद्वांसः

भारतसर्वकारेण २००९ वर्षस्य राष्ट्रपतिपुरस्काराय चितानां संस्कृतविदुषां नामानि १५-९-२००९ दिनाङ्के प्रकटिनान्यासन्। अभिनन्द्याः अभिवन्द्याश्च ते विद्वांसः आचार्याः इमे-

**संस्कृते**

कोम्पेल्ल-सूर्यनारायणः
वाचस्पतिशर्मा त्रिपाठी
रमाकान्तशक्लः
विश्वमूर्तिशास्त्री
एन्. एस्. अनन्तरङ्गाचारः
एन्. गोपालपणिक्करः
सुद्युम्नः आचार्यः
केशवरामरावजोशी
भगवान्पण्डा
कमल-आनन्दः
बदरीप्रसादशास्त्री
अन्नादुरराजगोपालाचार्यर्
रामचन्द्रपाण्डेयः
अशोककुमारकालिया
समीरणचन्द्रचक्रवर्ती

**पालि/प्राकृत-विषये**

धर्मचन्द्रजैनः

**महर्षिबादरायणव्याससम्मानः**

चन्द्रभूषणझाः
मल्हार-अरविन्दकुलकर्णी
सच्चिदानन्दमिश्रः
नारायणदाशः
शशिभूषणमिश्रः



स्वातन्त्र्यदिनोत्सवम् आचरन्तः गुरुवायूरुपरिसरसदस्याः

## प्रोन्नता

संस्थानमुख्यालये कार्यरता श्रीमती अरुणागान्धी अनुभागाधिकारिरूपेण प्रोन्नता सती अधुना छात्रवृत्तिविभागे कार्यं करोति।

## सेवाकालं पूरितवन्तः कर्मचारिणः

| नाम | संस्थानसेवायां प्रवेशतिथिः | सेवाविरतितिथिः | सेवाविरमणकाले पदम् |
|---|---|---|---|
| श्री आर्.एन्. रायः | २५-९-१९७२ | ३१-७-०९ | सहा० कुलसचिवः (परीक्षा) |
| श्री राजेन्द्रमोहनः | १-५-१९७२ | ३१-८-०९ | कार्या० सहायकः |
| श्री गोपालसिंहः | २५-९-१९७२ | ३१-८-०९ | दफ्तरी |

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम्।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्।।
-ऐत.ब्रा., ७.१९.५

## जयपुरे सम्पन्ना राष्ट्रिय-प्राकृत-सङ्गोष्ठी




समापनोत्सवे राधावल्लभत्रिपाठी, अनिताभटनागरजैन, नामवरसिंहः, युगलकिशोरमिश्रः, प्रेमसुमनजैनः, ब्रजकिशोरशर्मा, अर्कनाथचौधरी अन्ये च उपस्थिता आसन्।

जयपुरे अणुविभा-केन्द्रे राष्ट्रियसंस्कृतसंस्थानेन जुलाई मासस्य २५तः २७ दिनाङ्कं यावत् राष्ट्रियसङ्गोष्ठी समायोजिता। वैदिक-प्राकृत-मङ्गलाचरणाभ्यां समारब्धे उद्घाटनकार्यक्रमे भूतपूर्वः राज्यपालः न्यायमूर्तिः श्री अंशुमानसिंहमहोदयः मुख्यातिथिरूपेण उपस्थित आसीत्। उद्घाटनकार्यक्रमे मुख्यातिथिना सह आचार्यः राधावल्लभत्रिपाठी (कुलपतिः, रा.सं.सं.), श्रीमती रीता चटर्जी (निदेशिका भाषाणाम्, मा.सं.वि.म. भारतशासनम्), आचार्यः कमलेशदत्तत्रिपाठी (निदेशकचरः, का.सं. अकादमी, उज्जयिनी), आचार्यः एस्.पी. शर्मा (अलीगढ वि.वि.), मुनिश्रीविनयकुमारः, श्री चन्दनसिंहकनियालः (प्र. कुलसचिवः, रा.सं.सं.), आचार्यः अर्कनाथचौधरी (प्राचार्यः, रा.सं.सं. जयपुरपरिसरः) च मञ्चमलङ्कृतवन्तः। श्रीमती रीता चटर्जी सर्वान् स्वागतीकृत्य सङ्गोष्ठ्याः सफलतायै मङ्गलकामनां प्रायच्छत्। न्यायमूर्तिः श्रीमान् अंशुमान्महोदयः कार्यक्रमस्य शुभारम्भम् उद्घेष्य, प्रकृतायोजनस्य महत्त्वं प्रतिपादितवान्। आधारवक्तव्यं कथयता आचार्येण एस्.पी.शर्मणा भारतीयपरम्परासु प्राकृतभाषायाः स्थानमधिकृत्य विचाराः प्रस्तुताः।

> 'प्राकृतसाहित्यस्य सन्दर्भे भारतीयपरम्परायाः बहुलता विविधता च' इति विषयमधिकृत्य चर्चा प्रवृत्ता

आचार्यः कमलेशदत्तत्रिपाठिमहोदयः अभिप्रायं प्रकटितवान् यत् संस्कृतस्य प्राकृतस्य च उभयोः उदयस्थानं भारतमेव। परम्पराद्वयेनापि विषयाणामादानप्रदानं कृतम् इति। मुनिश्रीविनयकुमारमहोदयः जैनधर्मस्य प्राकृतभाषायाश्च गाढसम्बन्धं विवृतवान्। जैनाचार्यैः लिखितानि साहित्यानि उदाहृत्य स्वीयान् विचारान् प्रस्तुतवान्। उद्घाटनसत्रे अध्यक्षपदं विभूषयन् संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठिवर्यः न्यगादीत् यत् 'संस्कृत-प्राकृतभाषयोः परम्परयोः धार्मिक-दार्शनिक-साहित्यिकांशेषु बहोः कालात् गाढः अन्तःसम्बन्धः आसीत्' इति। एकम् उदाहरणं प्रस्तुवता तेन महोदयेनोक्तं गुणढ्यस्य बड्ढकहा मूलतः पैशाची-प्राकृते विलिखिता कालान्तरे क्षेमेन्द्रेण बुद्धस्वामिना च संस्कृते रूपान्तरीकृता सम्प्रत्युपलभ्यते इति। परम्परासु विविधतायां सत्यामपि तासु एकस्य केन्द्रीयतत्त्वस्य अवधारणा, अथ च एकस्य केन्द्रीयतत्त्वस्य विविधतायां समावेशः-इत्येषा भारतीयपरम्पराणां विशेषता इति च कुलपतिमहोदयेन प्रत्यपादि। उद्घाटनसत्रे संस्थानस्य जयपुरपरिसरप्राचार्येण अर्कनाथचौधरीमहोदयेन धन्यवादार्पणं कृतम्।

दिनत्रयात्मिकायां सङ्गोष्ठां षट्सु सत्रेषु आहत्य ५० शोधपत्राणि प्रस्तुतानि अभवन्। विविधसत्रेषु अध्यक्षरूपेण आचार्याः दयानन्दभार्गवः, श्रीयांशकुमारसिङ्घई, कोकिला एच् शाहः, सागरमलजैनः, कलानाथशास्त्री, अर्कनाथचौधरी, दामोदरशास्त्री, सुदीपजैनः, रामजीरायः, प्रेमसुमनजैनः, सत्यप्रकाशशर्मा, विनयसागरः, फूलचन्दजैनः, विजयकुमारजैनः, शीतलचन्दजैनः, वृषभप्रसादजैनः, कमलेशकुमारजैनः च आसन्।

२७-७-२००९ दिनाङ्के अपराह्णे समापनसत्रं वर्धास्थ-अन्ताराष्ट्रिय-हिन्दीविश्वविद्यालयस्य कुलाधिपतेः डा. नामवरमहोदयस्य आध्यक्ष्ये सम्पन्नम्। दिनत्रयं यावत् प्रवृत्तकार्यक्रमविषये विवरणं कुर्वन् आचार्यः राधावल्लभमहोदयः अकथयत् यत् संस्कृतं प्राकृतभाषाविकासकार्ये सहकारकम् अस्ति। अस्यां सङ्गोष्ठ्यां वरिष्ठविदुषां परामर्शाः कनिष्ठैः प्राप्ताः। प्राकृतवाङ्मयनिबद्धं साहित्यं, दर्शनं, धर्मशास्त्रम्, काव्यं, जीवनमूल्यं च आधारीकृत्य विभिन्नदृष्टिकोणैः परिचर्चा प्रवृत्ता। आगम-निगम-ब्राह्मणश्रमणपरम्पराणां च संवादस्य कतिचनांशाः चर्चावसरे प्रकाशमागताः' इति।

आचार्यः प्रेमसुमनजैनः भाषणमाणः ज्ञापितवान् यत् भारते बह्वयः अप्रकाशिताः प्राकृतभाषा-पाण्डुलिपयः सन्तीति। डा. कलानाथशास्त्रिमहोदयः सभां सम्बोधयन् नाटकेषु विद्यमानप्राकृतप्रयोगमुदाहृत्य स्वीयं मतम् उपन्यस्तवान्। मुख्यातिथिरूपेण समुपस्थिता डा. अनिताभटनागरजैनमहाभागा (संयुक्तसचिवा, भाषा, मा.सं.वि.म.) उक्तवती यत् 'भाषा पशूनां मानवानां च पृथक्करणतत्त्वेषु अन्यतमा। मानवजीवने भाषाणां बहु महत्त्वमस्ति। परिष्कृतभाषायाः प्रयोगः जीवनं समुन्नेतुं प्रभवति। अद्यत्वे भाषाविलोपविषयिणी समस्या युनेस्कोद्वारा अपि प्रकटिता वर्तते। किन्तु राष्ट्रियसंस्कृतसंस्थानं तदीयकार्यक्रमैः भारतस्य सांस्कृतिकगौरवं संरक्षितुं यतते इति हर्षस्य विषयः' इति। कार्यक्रमे ज.रा. राजस्थान-सं.विश्वविद्यालयस्य कुलपतिः आचार्यः युगलकिशोरमिश्रः, राजस्थान-परिवहन-संस्कृतिमन्त्री श्री ब्रजकिशोरशर्मा च शुभाशंसनं व्यक्तीकृतवन्तौ। सभाध्यक्षः श्री नामवरसिंहः संस्कृतनाटकेषु मध्ये मध्ये प्रयुक्त-प्राकृतप्रयोगानां विषये दृष्टिं प्रसार्य प्राकृते जातानां रचनानां विहगावलोकनं प्रस्तुतवान्। उद्घाटनदिविविधसत्रेषु मञ्चसञ्चालन-व्यवस्थादिविविधकार्येषु च डा. वाई.एस्.रमेश-डा. रत्नमोहनझा-डा.विजयकुमारजैन - डा. शुक्लामुखर्जीप्रभृतिभिः, जयपुरपरिसरसदस्यैश्च सहयोगः कृतः। चन्दनसिंहकनियालः धन्यवादं व्याहरत्।

**संस्थानेन अनतिपूर्वं**
**प्रकाशिताः दृश्य-श्रव्य सान्द्रमुद्रिकाः**




- संक्षेपरामायणम् (DVD)
- शब्दकल्पद्रुमः
- वैदिकगणितम्
- कविभास्करी
- कथादशकम्

## शृङ्गेरीपरिसरे संस्कृतोत्सवः



संस्कृतोत्सवस्य शुभारम्भं कुर्वन्तः स्वामिपादाः श्री श्री भारतीतीर्थमहास्वामिनः।

शृङ्गेरीपरिसरे ऐषमः संस्कृतोत्सवः अगस्त-मासस्य चतुर्थदिनाङ्कादारभ्य अष्टमदिनाङ्कपर्यन्तं समपद्यत। नृसिंहवनस्य गुरुभवने श्रीदक्षिणाम्नायशारदापीठाधीश्वराः जगद्गुरवः श्री श्री भारतीतीर्थमहास्वामिनः उत्सवममुं उदजीघटन्। अनुग्रहभाषणे भाषमाणाः जगद्गुरवः संस्कृताध्ययनेन शान्तिरधिगम्यते, ऋषिप्रोक्तशास्त्राणि आत्मसात्कर्तव्यानि इत्यूचुः। सम्प्रति परिसरोऽयं एधमानः अस्माभिः लक्षितः इति ते अन्वग्रहीषुः। परिसरप्राचार्यः रामानुजदेवनाथमहोदयः संस्कृतोत्सवस्य उद्देश्यम्; परिसरस्यास्य प्रगतिं, परिसरेण प्राप्तपरियोजनाः च विवृण्वन् जगद्गुरुभ्यः, आगतेभ्यः सभ्येभ्यः च स्वागतं व्याहरत्। परिसरप्राचार्यस्य मार्गदर्शने डा. सुब्राय वि भट्टेन, डा. चन्द्रकला आर्. कोण्डिमहोदयया च सम्पादितं सारस्वताभिधं पुस्तकम्, डा. चन्द्रशेखरभट्ट- डा. भगवान् सामन्तरायाभ्यां सम्पादितं वाक्यार्थभारतीनामानं ग्रन्थं च श्रीचरणाः श्री श्री भारतीतीर्थमहास्वामिनः लोकायार्पितवन्तः।

### शारदाविशिष्टव्याख्यानमाला

चतुर्थदिनाङ्के मध्याह्ने ऐषमः शारदाविशिष्टव्याख्यानमाला राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरेण प्रह्लादाचार्यमहोदयेन समुदघाटि। समासशक्तिः इति विषयमधिकृत्य भाषमाणेन तेन विदुषा न्यायशास्त्ररीत्या समासे शक्तिरस्ति न वेति विचार्य नास्तीति सिद्धान्तः प्रत्यपादि। एतादृशसभाभिः अध्यापकाः छात्राः च लाभान्विताः भवन्ति इत्यभिप्रायः च प्राकाशि। अध्यक्षभाषणं कुर्वता परिसरप्राचार्येण प्रह्लादाचार्यवर्यस्य पाण्डित्यं अनुशासननैपुण्यं च प्रास्तावि।



श्रीशारदाविशिष्टव्याख्यानमालाम् उद्घाटयन् प्रह्लादाचार्यः, रामानुजदेवनाथः च

### संस्कृतभाषण-भगवद्गीताकण्ठपाठादिस्पर्धाः

संस्कृतोत्सवाङ्गतया शृङ्गगिरिसमीपस्थप्रौढपाठशालाच्छात्राणां कृते संस्कृतभाषण-भगवद्गीताकण्ठपाठादिस्पर्धाः आयोजिताः। शृङ्गेरीपरिसरस्थाः पाठशालाच्छात्राः सोत्साहं भागमवहन्। श्रीमती शैलजारत्नाकरहेग्डेमहोदया शृङ्गेरी उपमण्डलकन्नडपरिषदः अध्यक्षचरा पुरस्कारवितरणकार्यक्रमे भागमूढ्वा छात्रेभ्यः पुरस्कारान् प्रादात्।

### हरिकथा

हरिकथाप्रवक्तृत्वेन बहुविश्रुतः वैयाकरणः श्री शङ्करभट्टः 'सीतान्वेषणम्' इति विषयमाधारीकृत्य संस्कृतभाषया हरिकथां प्रास्तौत्। हरिकथाशैल्या तस्य प्रवचनं सर्वेषां हृदयानि अचूचुरत्। अयं च विनूत्नः कार्यक्रमः परिसरे ऐदम्प्राथम्येन अनुष्ठितः। परिसरप्राचार्यः अवदत् यत् "एतादृशप्रवचनानि भारतीयसम्प्रदायानां सजीवत्त्वं निरूपयन्ति, अस्मच्छात्राश्च उद्बुद्धाः प्रेरिताश्च सन्तः एतद्विद्यामधिगच्छेयुः" इति।



हरिकथाप्रसङ्गः

### काव्योपासना

उत्सवस्य तृतीयदिने काव्योपासना-नामकः कश्चन विशिष्टः कार्यक्रमः अनुष्ठितः। परिसरप्राचार्यः रामानुजदेवनाथः, डा.ई.पी. श्रीदेवी, डा. चन्द्रकान्तवर्यः, श्री.सि.हेच्. कृष्णानन्तपद्मनाभः, डा. गणेश-ईश्वर-भट्टः, डा. राघवेन्द्रभट्टः, डा. भगवान् सामन्तरायः, डा. सूर्यनारायणभट्टः, डा. रामचन्द्रजोयिसः च स्वीयैः कवनैः सभां रञ्जितवन्तः। अध्यक्षभाषणावसरे प्राचार्यः 'गोपवरा'-नामके स्वोपज्ञे छन्दसि निबद्धां कविताम् अश्रावयत्। अस्मच्छात्राः स्फूर्त्या अहमहमिकया कविताः रचयेयुरित्याशासे इति च अकथयत्। डा. चन्द्रकान्तमहोदयः कार्यक्रममम् सञ्चालितवान्।

### शास्त्रसपर्या

तार्तीयीके दिने मध्याह्ने शास्त्रसपर्यानामकः कश्चन विनूत्नः कार्यक्रमः अनुष्ठितः यत्र परिसरविभागाध्यक्षैः स्वस्वशास्त्रस्य समाजोपयोगिता का इति सुनिपुणं प्रास्तवि। शिक्षाशास्त्रविभागाध्यक्षः आचार्यः ए.पि. सच्चिदानन्दः, डा. सुब्राय वि. भट्टः, व्याकरणविभागाध्यक्षः डा. सि.एस्. नरसिंहमूर्तिः, न्यायविभागाध्यक्षः, डा. नवीनहोळ्ळः, साहित्यविभागाध्यक्षः डा. ई.पी. श्रीदेवीः ज्योतिषप्राध्यापकः श्री हेच्. के. श्रीनाथः च स्वस्वशास्त्रस्य समाजोपयोगितां प्रत्यपादयन्।

## शोभायात्रा




वेदवन्दनकार्यक्रमे वेदमूर्ती गणपतिभट्ट-विश्वनाथभट्टौ

उत्सवस्य चतुर्थदिने परिसरेण शोभायात्रा समायोजि। सर्वेऽपि छात्राः अध्यापकाश्च अत्र भागमवहन्। संस्कृतस्य वैशिष्ट्यद्योतकानि चित्रादीनि हस्तेन धरन्तः, संस्कृतोद्घोषं कुर्वन्तः, वीथीषु गच्छन्तः छात्राः जनेषु संस्कृतविषये श्रद्धाभावम् उदपादयन्। परिसरतः आरब्धा शोभायात्रा सर्वकारीयकलाशालापर्यन्तमगात्। तत्र कलाशालायां प्रौढशालाच्छात्रैः संस्कृते विविधाः सांस्कृतिककार्यक्रमाः प्रदर्शिताः। ते छात्राः श्लोकगानं, संस्कृतगीतगानं, नृत्यम्, प्रहसनं, भाषणं च अकार्षुः। डा. सुब्राय वि. भट्टः संस्कृतभाषाध्ययनस्य आवश्यकता का इति विवृतवान्। परिसरप्राचार्यः देवनाथवर्यः संस्कृतभाषायाः प्राच्यता कीदृशीति सुनिपुणं न्यरूपयत्। सर्वकारकलाशालायाः प्राचार्यः स्वभाषणे अकथयत् यत् संस्कृतं प्रपञ्चशान्तिं यच्छति इति। संस्कृतज्ञमध्ये मम स्थितिः मे मनसि मोदं जनयति, संस्कृतार्थं मत्पक्षतः यद्यत्कर्तव्यमपेक्ष्यते तच्चिकीर्षामि इति च सः अकथयत्।

## वेदवन्दनम्




संस्कृतोत्सवस्य समापनकार्यक्रमे भाषमाणः श्रीधरवसिष्ठः। सुब्रायभट्ट, प्राचार्यः देवनाथः, सच्चिदानन्द-उडुपः च दृश्यन्ते

श्रीमठीयौ विद्वांसौ श्री गणपतिभट्टः, श्री विश्वनाथभट्टः च विवरणपूर्वकं वैदिक-विकृतिपाठान् प्रादर्शयताम्। तौ संहिता-पद-क्रम-जटा-घन-दण्ड-रथादिभेदेन विद्यमानाः विकृतीः सुस्पष्टतया विशदीकृतवन्तौ। ईदृशः वेदवन्दनकार्यक्रमः अभूतपूर्वः परिसरे संवृत्तः ऐदम्प्राथम्येन। कार्यक्रमान्ते भाषमाणः प्राचार्यः अवदत् 'प्राचीनाः साङ्केतिकज्ञानं कथं वर्धयन्ति स्म इति अनेन कार्यक्रमेण अस्माभिरवगन्तुं शक्यते' इति। एतादृशसम्प्रदायाः अस्माभिः परिरक्षणीयाः इति च छात्राः प्राचार्येण उद्बोधिताः।

## समारोपसमारोहः

श्री लालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरः आचार्यश्रीधरवशिष्ठमहोदयः समारोपसमारोहे मुख्यवक्तृरूपेण आमन्त्रितः। तेनोक्तं यत् पाश्चात्त्यसंस्कृतौ, आङ्ग्लभाषायां च अति-व्यामोहं संस्कृतज्ञः उत्सृजेत्। तदैव संस्कृतक्षेत्रे आवश्यकताः पूर्णाः भवेयुः इति। परिसरप्राचार्येण भाषणावसरे उक्तं यत् 'आचार्यश्रीधरवशिष्ठाः सर्वेषु विज्ञानेषु भारतीयतत्त्वमेव सर्वदा बोधयन्ति स्म, ततः प्रभावितोऽहं सर्वदा आदौ भारतीयमेव तत्त्वं विवृणोमि' इति। स्वागतं व्याहरत् शिक्षाशास्त्रविभागाध्यक्षः आचार्यः ए.पि. सच्चिदानन्दः। कार्यक्रमोऽयं श्री सुब्राय वि. भट्टानां धन्यवादार्पणेन समाप्तिमगात्।

## विविधगतिविधयः

### विश्वविद्यालयानुदानायोगसमित्या शृङ्गेरीपरिसरनिरीक्षणम्

अगस्त-मासस्य दशमदिनाङ्के विश्वविद्यालयानुदानायोगसमितिः शृङ्गेरीपरिसरनिरीक्षणमकरोत्। तत्र कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयस्य कुलपतिः आचार्यः पङ्कजचान्देवर्यः समितेः अध्यक्षत्वेन, हरिद्वारस्थ-उत्तराञ्चल-संस्कृतविश्वविद्यालयस्य कुलपतिः आचार्या सुधाराणीपाण्डेया सदस्यत्वेन च समुपस्थितावास्ताम्। राष्ट्रियसंस्कृतसंस्थानस्य परियोजनाधिकारिणी डा. शुक्लामुखर्जी च समुपस्थिता आसीत्।

परिसरस्य सर्वविभागानां, छात्रावासादीनां च निरीक्षणात् परं समित्या राजीवसरोवरोद्घाटनं कृतम्। छात्रगणेन अध्यापकवृन्देन च सह समित्या प्रत्यक्षसंवादः कृतः। निरीक्षणकार्यान्ते समितेरध्यक्षेण कथितं यत् सर्वोऽपि विभागः क्षुण्णं वीक्षितः, अयं परिसरः आधुनिके काले पारम्परिकसंस्कृताध्ययनस्य केन्द्रबिन्दुः इति। आचार्या सुधाराणीमहोदया अवदत् यत् अयं परिसरः गुरुकुलवद्भातीति।

परिसरप्राचार्यः परिसरस्य निर्माणविषये तृतीयस्तरप्रगतिम्, परिसरस्य परियोजनाः च व्यवृणोत्। न्याय-व्याकरणादिविभागानां पक्षतः चिकीर्षितं शास्त्रसभायोजनं, साहित्यविभागपक्षतः ईप्सितं रङ्गभवनम् ........ इत्यादिरूपेण प्राचार्येण विवृतम्।

### स्वातन्त्र्योत्सवः

अगस्तमासस्य १५ दिनाङ्के स्वातन्त्र्योत्सवः अनुष्ठितः। प्राचार्यः प्रातः ८.३० वादने ध्वजारोहणमकरोत्। सर्वेऽपि अध्यापकाः कार्यक्रमेऽस्मिन् भागमवहन्। बहवः छात्राः कविताभिः भाषणैः, गानैः, नृत्यैः भारतमातर-मस्तुवन्। वेदान्तविभागाध्यक्षः डा. महाबलेश्वर-भट्टः, आङ्ग्लाध्यापकः श्री विनयः च भाषणमकुरुताम्। शिक्षाशास्त्रविभागाध्यक्षः आचार्यः ए.पि. सच्चिदानन्दवर्यः स्वागतं व्याहरत्। आध्यक्ष्यभाषणे प्राचार्यः स्वातन्त्र्यदिनोत्सवा-चरणमहत्त्वम् उद्दिश्य अभाषत।

### गणेशचतुर्थी

ऐषमः गणेशचतुर्थीपर्व छात्रावासे छात्रैः अनुष्ठितम्। सामूहिकयत्नेन छात्रैः एकीभूय आयोजितेऽस्मिन् दिनत्रयात्मके कार्यक्रमे अध्यापकवृन्दः उपस्थितः आसीत्।

### वाक्यार्थपरिषद्

वाक्यार्थपरिषदः द्वितीयमधिवेशनम् अगस्तमासे २५ दिनाङ्के संवृत्तम्। साहित्यविभागाध्यक्षा डा. ई.पी. श्रीदेवी, शिक्षाशास्त्र-वरिष्ठाध्यापकः डा. रामचन्द्रुलबालाजी, मीमांसाविभागाध्यापकः श्री वेङ्कटेशताताचार्यः, ज्योतिषाध्यापकः श्री हेच्. के. श्रीधरः च यथाक्रमम् उपमाप्रभेदाः, अन्तर्दृष्ट्यधिगमः, वैश्वदेवे व्यधिकरणम्, पञ्चमभावः, इत्येतान् विषयानधिकृत्य स्ववाक्यार्थानुपास्थापयन्। डा. सि.एस्.एस्. नरसिंहमूर्तिमहोदयः कार्यक्रममम् समचालयत्।

### शोधच्छात्रसभा

परिसरप्राचार्यस्य मार्गदर्शने शोधच्छात्रसभा अगस्तमासे २७ तमदिनाङ्के डा. चन्द्रकान्त-डा. रामचन्द्रजोयिस्-वर्ययोः संयोजकत्वे संवृत्ता। शिक्षाशास्त्रविभागाध्यक्षः आचार्यः सच्चिदानन्दः कार्यक्रमममुमारब्धवान्। शोधच्छात्राः श्री अनन्तकृष्णः, श्री टी. गणपतिशास्त्री, कुमारी टी श्रीलक्ष्मीः, कुमारी श्रुतिः च-असिद्धिविमर्शः, अद्वैतमतानुसारेण मोक्षः, चम्पूरामायणे युद्धकाण्डस्य समीक्षात्मकमध्ययनम्, दशोपनिषदुद्धृतानां दृष्टान्तानां विमर्शः इति विषयेषु भाषणमकार्षुः।

### भाषाबोधनवर्गः

दशदिनात्मकभाषाबोधनवर्गः अगस्तमासस्य २७ दिनाङ्कतः प्राचलत्। शिक्षाशास्त्राध्यापकः डा. गिरिधरराव:, न्यायाचार्यच्छात्रः श्री उदयनः च कार्यक्रममम् चालितवन्तौ।

## लखनऊपरिसरे संस्कृतोत्सवः

लखनऊपरिसरे त्रिदिवसीयः संस्कृतोत्सवः सोल्लासं समायोजितः। समारोहस्योद्घाटनं ०४-०८-०९ दिनाङ्के मङ्गलवासरे दिवा एकादशवादने महात्मागान्धीकाशीविद्यापीठस्याध्यापकचरस्य आचार्यस्य रमेशचन्द्रतिवारीमहाशयस्याध्यक्ष्ये सुसम्पन्नम्। मञ्चासीनाः अध्यक्षप्रमुखाः विद्वांसः वर्तमानसमये संस्कृतभाषायाः संस्कृतविद्यायाश्च बहुविधामुपयोगितां प्रदर्श्य तद्विधानुष्ठाने संस्कृतलोकस्याह्वानं कृतवन्तः। ततस्तस्मिन्नेव दिनेऽपराह्णे द्विवादनतः परिसरीयच्छात्राणां द्वे प्रतियोगिते समायोजिते। प्रथमा प्रतियोगिता 'व्याकरणे अच्सन्धिः' इति विषयमवलम्ब्य भाषणपरा आसीत्। द्वितीया श्लोकान्त्याक्षरीप्रतियोगिता दीर्घतरा सम्पन्ना। प्रतियोगिताद्वये प्रथमद्वितीयतृतीयसान्त्वनाभिधानाः पुरस्काराश्चोद्घोषिताः।




संस्कृतोत्सवे समुपस्थिताः विजयकुमारजैनः, शिवानन्दमिश्रः, सूर्यमोहनकुलश्रेष्ठः, रीताबहुगुणा, सर्वनारायणझाः च

५-८-०९ दिनाङ्के बुधवासरे श्रावणीरक्षाबन्धनपर्वानुरोधाद् दिवा द्विवादनतः संस्कृतदिवसप्रयुक्तः कार्यक्रमः समारब्धः। समारोहस्येदं मध्यसत्रं लखनऊ-विश्वविद्यालयस्याचार्यचरस्य शिवनन्दनमिश्र- महाशयस्याध्यक्ष्ये, उत्तरप्रदेशकाङ्ग्रेसकमेटी-अध्यक्षायाः श्रीमत्याः रीताबहुगुणामहोदयाया मुख्यातिथित्वे च सम्पन्नम्। उत्तरप्रदेशविधानसभायाः सदस्यः माननीयः श्रीभगेलूराममहोदयः तथा लक्ष्मणपुरीयभारतेन्दुनाट्य-अकादम्याः निदेशकः डॉ. श्रीसूर्यमोहनकुलश्रेष्ठमहोदयश्च मध्यसत्रे विशिष्टावतिथी आस्ताम्। श्रीमती रीताबहुगुणा संस्कृतस्य पारम्परिकं महत्त्वमभिधाय संस्कृतज्ञानामाधुनिकं स्वरूपं, संस्कृतस्य समयोचितप्रयोजनं च प्रतिपादितवती। श्रीभगेलूराममहाशयः संस्कृतसेवायां स्वकीयां विशिष्टामभिरुचिं प्रास्तौत्। डॉ. कुलश्रेष्ठः संस्कृतनाटकानां शास्त्रीयतां प्रायोगिकतां च निरूपितवान्। परिसरस्य प्राचार्यः सर्वनारायणझामहोदयः प्रान्तीयविधानसभासदस्यं श्रीभगेलूराममभिलक्ष्य परिसरीयशिक्षाशास्त्रिच्छात्रा- ध्यापकानां प्रादेशिकविद्यालयेषु मान्यताविषयिणीं महतीं समस्यां प्रभाविस्वरेण विनिवेदितवान्। सभाध्यक्षो मिश्रमहोदयो निजानुभवसाक्षिकं संस्कृतस्य महत्त्वं विदेशेष्वपि वर्तत इति वर्णितवान्।

६-८-०९ दिनाङ्के बृहस्पतिवासरे तृतीये दिवसे दिवा ११ वादनतः लखनऊनगरीयविद्यालयीयच्छात्राणां श्लोकपाठप्रतियोगिता सम्पन्ना। अन्ते चापराह्णे समापनसत्रे सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरस्य आचार्यस्य अशोककालियामहोदयस्याध्यक्ष्ये माननीयसंसत्सदस्यस्य डॉ० सञ्जयसिंहमहोदयस्य मुख्यातिथित्वे च छात्राणां पुरस्कारवितरणं सम्पन्नम्। 'वर्तमानशताब्द्यां संस्कृतभाषायाः व्यापकता बहुजनस्वीकार्यता च यथा सम्भवेत् तथोपायोऽवश्यं चिन्त्यः' इत्येषः विद्वद्भाषणनिष्कर्षः सर्वैरभिनन्दितः। समयोचितव्यावहारिकतामनुरुध्य संस्कृतस्याजीविकापरक- विकासक्रमे विविधेषु क्षेत्रेषु नवाः प्रयासा अपेक्ष्यन्ते इति विदुषां विचार आसीत्। संस्कृतसमारोहस्यास्य संयोजनं डॉ. लक्ष्मीनिवासपाण्डेयः सम्पादितवान्।




संस्कृतोत्सवस्य उद्यापनावसरे प्रकाशचन्द्रः, कलाचार्या, गुलामदस्तगीरः, एम्.ए.बाबुः च

## मुम्बई-परिसरे संस्कृतोत्सवः

०३.०८.०९ तः ०५.०८.२००९ पर्यन्तं मुम्बय्यां क.जे.सा.सं.परिसरे भव्यतया त्रिदिवसीयः संस्कृतोत्सवः समनुष्ठितः। तत्र ०३.०८.२००९ दिनाङ्के अपराह्णे द्विवादने आचार्यस्य एन्.एन्. जोशीमहाभागस्य मुख्यातिथित्वे समुद्घाटनसमारोहः सम्पन्नः। आध्यक्ष्यञ्च विशेषकार्याधिकारिणः आचार्यस्य एम्.ए. बाबूमहाशयस्यासीत्। अत्र वैदिकमङ्गलाचरणानन्तरम् आचार्येण प्रकाशचन्द्रमहोदयेन समागतानां विदुषां स्वागतं विहितम्। प्राचार्येण विद्यापीठप्रमुखैश्च ऊर्णोत्तरीयश्रीफलपुष्पादिभिरतिथेः सम्माननं कृतम्। डा. देवदत्तसरोडेद्वारा प्राकरणिकं भाषणं कृतम्। धन्यवादसमर्पणं आचार्येण कमलेशचन्द्रयोगिना, सञ्चालनं च डा. सुशान्तकुमारराज इत्यनेन च व्यधायि।

०४.०८.२००९ दिनाङ्के च परिसरस्तरीया संस्कृतभाषणप्रतियोगिता वरिष्ठवर्गकनिष्ठवर्गयोर्विभज्य समायोजिता। तत्र वरिष्ठवर्गस्य कृते विषयः "भाषाविकासे संस्कृतस्य भूमिका", अपि च कनिष्ठवर्गस्य कृते "आधुनिककाले संस्कृतस्याऽऽवश्यकता" इति विषयो निर्धारितः। एवमेव द्वयोः वर्गयोः कृते संस्कृतगीतप्रतियोगिताऽपि सम्पन्ना यत्र बहवः छात्राः सोत्साहं भागमगृह्णन्।

०५.०८.२००९ दिनाङ्के संस्कृतोत्सवस्य समापनकार्यक्रमः आचार्यगुलामदस्तगीर-बिराजदारमहोदयस्य मुख्यातिथित्वे, डा. कलाचार्यामहाभागायाः सारस्वतातिथित्वे, परिसरीयविशेषकार्याधिकारिणः एम्.ए. बाबूमहोदयस्याध्यक्ष्ये च समायोजितः। अत्र विदुषामतिथीनाञ्च प्रभाविभाषणानन्तरं, पूर्वेद्युः सम्पन्नप्रतियोगितासु विजयिभ्यः प्रथमद्वितीयतृतीयपारितोषिकाः प्रदत्ताः। सर्वैः छात्रैः, अध्यापकैः, कर्मचारिभिश्च संस्कृतसेवाकरणस्य नूतनः सङ्कल्पः अस्मिन्नवसरे कृतः।

## भोपालपरिसरे संस्कृतसप्ताहः




आजादमिश्रः, एस.के.सिंहः, श्री ऋतपतिपरिव्राजकस्वामिनः, कमलाप्रसादः, पी.एन्.शास्त्री च

भोपालपरिसरेण समायोजितस्य संस्कृतसप्ताहस्य उद्घाटनसमारोहः स्थानीय प्रशासन-अकादम्यां प्रवृत्तः। वैदिकमङ्गलाचरणेन प्रारब्धे अस्मिन् कार्यक्रमे परिसरप्राचार्यः आजादमिश्रमहोदयः स्वागतभाषणमकरोत्। संस्कृतसप्ताहायोजनस्य उद्देश्यं उक्त्वा सप्ताहव्यापिनः कार्यक्रमस्य विवरणं च प्रास्तौत्। कार्यक्रमे मुख्यातिथिरूपेण समागतेन मध्यप्रदेश- भोजमुक्तविश्वविद्यालयस्य कुलपतिना आचार्येण एस्.के.सिंहमहोदयेन अभिप्रायः प्रकटितः यत् विज्ञानप्रौद्योगिक्याः अस्मिन् युगे संस्कृतवाङ्मयानुशीलनेन कतिचन-नूतनानुसन्धानानि कर्तुं पार्येत इति। अध्यक्षपदं विभूषयन्तः होशङ्गाबादस्थ-आर्षविद्यागुरुकुलात् समागताः पूज्याः ऋतपतिपरिव्राजक- स्वामिपादाः आशीर्वचनं प्रदाय अनुगृहीतवन्तः। तैः संस्कृतसप्ताहादिकार्यक्रमा- योजनाय भोपालपरिसरेण क्रियमाणाः प्रयत्नाः प्रशंसिताः। सारस्वतातिथिपदम् अलङ्कुर्वता सुप्रसिद्धेन साहित्यिकेन डा. कमलाप्रसादमहोदयेन सभां सम्बोध्य संस्कृतमहत्त्वं विशेषरूपेण प्राकाशि। अवसरेऽस्मिन्, संस्कृतक्षेत्रे विशिष्टसेवां कृतवन्तः पञ्च विद्वांसः-श्री मनोहरलालदूबे, श्री के.के. चौबे, श्री आनन्दसिंहः, डा. ज्योत्स्ना निगमः, डा. महेशजैनः च श्रीफलोत्तरीयप्रशस्तिपत्रैः सम्मानिताः। संस्थानच्छात्रैः व्याकरणशास्त्रविषयमधिकृत्य पारम्परिकशैल्या 'शास्त्रार्थविचारः' प्रस्तुतः। परिसरीयाध्यापकः डा. ब्रजभूषण-ओझा कार्यक्रमं समचालयत्। संस्कृतसप्ताहाङ्गतया भोपालपरिसरेण विभिन्न-शास्त्रीयभाषणस्पर्धाः, पारम्परिकमनुष्ठानम्, संस्कृतश्लोकगानप्रतियोगितादिकमपि आयोजितमासीत्।



परिसरनिरीक्षणावसरे समुपस्थिताः समितिसदस्याः

## भोपालपरिसरस्य निरीक्षणम्

भोपालपरिसरस्य निरीक्षणाय वि.वि. अनुदान-आयोगेन प्रेषिता पञ्चसदस्यसमितिरेका ८-९-०९ दिनाङ्के परिसरस्य निरीक्षणमकरोत्। समितौ आचार्यः पङ्कजचान्दे (कुलपतिः, क.गु. का.सं.वि.वि. रामटेक्), आचार्यः युगलकिशोरमिश्रः (कुलपतिः, ज.रा.रा.सं.वि.वि. जयपुरम्), आचार्यः बलदेवमेहरा: (महर्षिदयानन्दसरस्वती वि.वि., रोहतक्), आचार्यः डोडामणिः (मैसूरुविश्वविद्यालयः), आचार्यः रामानुजदेवनाथः (प्राचार्यः शृङ्गेरीपरिसरः) च आसन्। निरीक्षणसमित्या परिसरस्य विभिन्नशैक्षिकोपलब्धीनां, योजनानां, छायाचित्रप्रदर्शिन्याः, विश्वव्यापिजाले उपलप्स्यमान-संस्कृतविद्वद् विवरणिकायाः, ग्रन्थालयस्य, परिसरस्य निर्माणाधीनभवनस्य च निरीक्षणं कृतम्।

## गुरुवायूरुपरिसरे

### संस्कृतोत्सवः



संस्कृतोत्सवम् उद्घाटयन् जे.प्रसादः। सत्यनारायण-आचार्यः के.टि. माधवन् परिसरस्य सदस्याश्च

गुरुवायूर्-परिसरे ०३-०८-०९ आरभ्य ०७-०८-०९ पर्यन्तं संस्कृतोत्सवः प्राचलत्। अस्य उद्घाटनं तृतीयदिनाङ्के सार्धदशवादने कालटीस्थ-श्रीशङ्कराचार्य-संस्कृतविश्वविद्यालयस्य कुलपतिः डा. जे. प्रसादमहोदयः अकरोत्। तिरुपतिस्थ-राष्ट्रियसंस्कृतविश्वविद्यालयस्य साहित्यविभागाध्यक्षः डा. सत्यनारायणाचार्यः मुख्यभाषणमकरोत्। 'संस्कृतभाषाज्ञानां अधीना अस्याः भाषायाः प्रगतिः। संस्कृतज्ञानां परिश्रमेण एव संस्कृतस्य विकासः सम्भवति। भाषायाः प्रयोगेन एव सा समाजे आदृता स्थास्यति। अतः संस्कृतसंभाषणम् अवश्यं परिपालनीयम्' इति स्वकीयभाषणे सर्वान् उदबोधयत्। अध्यक्षभाषणं कुर्वन् परिसरप्राचार्यः के.टि. माधवन्-महोदयः भाषायाः सौन्दर्यमधिकृत्य उपन्यस्तवान्। श्रवणलेखनमननैः भाषा सुन्दरतमा भविष्यतीति तेन उद्घोषितम्।

अस्मिन्नेव दिने मध्याह्ने डा.पि. इन्दिरायाः पर्यवेक्षणे स्तोत्रपाठस्पर्धा, डा. मधुसूदनस्य पर्यवेक्षणे भाषणस्पर्धा च प्राचलत्। अनेके छात्राः भागमगृह्णन्। चतुर्थदिनाङ्के प्रातः भगवद्गीतापाठस्पर्धा, अन्त्याक्षरीस्पर्धा एकपात्राभिनयस्पर्धा च आयोजिता आसीत्। आचार्या वि.के. शैलजा, डा. आर्. प्रतिभा, आचार्या सि. एल्. सिसिली च यथाक्रमम् स्पर्धायाः अधीक्षणमकुर्वन्। पञ्चमदिनाङ्के आचार्यस्य पि. जि. श्रीनिवासन्महोदयस्य आध्यक्ष्ये छात्राणां सङ्गोष्ठी प्राचलत्। आचार्यः सि. एच्. लक्ष्मीनारायणशर्मा तस्मिन्नेव दिने प्रवृत्तप्रश्नोत्तरीकार्यक्रमे अध्यक्षः आसित्। पूर्वोक्त-सर्वासु प्रतियोगितासु अनेके छात्राः भागग्राहिणः अभूवन्।

०६-०८-०९ दिनाङ्के प्रातः 'संस्कृतं प्रवृत्तिक्षेत्राणि च' इति विषये सङ्गोष्ठी आयोजिता। आचार्यः पि. सि. मुरलीमाधवमहोदयः (श्रीशङ्कराचार्यविश्वविद्यालयः कालटी) सङ्गोष्ठ्याः उद्घाटनमकरोत्।



सङ्गोष्ठ्यां भाषमाणः पी.सी. मुरलीमाधवः, रामन् कुट्टिः, इच्छारामद्विवेदी, प्राचार्यः अन्ये च।

अस्यां सङ्गोष्ठ्यां 'संस्कृतं पर्यावरणञ्च' इति विषये - डा. रमन्कुट्टि, (प्राचार्यःचरः) (२) संस्कृतं कृषिविज्ञानञ्च इति विषयमधिकृत्य डा. पि. इन्दिरा (साहित्याध्यापिका, (३) पत्रधर्मम् आधारीकृत्य, कुमारी जिजि च शोधपत्रसमर्पणमकुर्वन्। आचार्यः इच्छारामद्विवेदी (ला.ब.शा. रा.सं.सं. विद्यापीठस्य पुराणेतिहासविभागाध्यक्षः) मुख्यभाषणमकरोत्। 'संस्कृते विद्यमानविज्ञानस्य समार्जनेन अस्माकं कल्याणं भविष्यति। मधुरा, सरला, सम्भाषणानुकूला सुयोग्या भाषा संस्कृतम्' इति सविस्तरं तेन प्रतिपादितम्। परिसरस्य शिक्षाशास्त्रविभागाध्यक्षः आचार्यः सि.एच्. लक्ष्मीनारायणशर्मा स्वागतभाषणं, साहित्यविभागाध्यक्षः डा.इ. इम्, राजन् आशंसाभाषणं, डा. सिजिल् छात्रकल्याणसमितिसचिवः कृतज्ञताभाषणं च अकरोत्। अन्ते छात्रैः प्रदर्शिताः सङ्गीतनृत्यादयः कार्यक्रमाः सर्वजनरञ्जकाः आसन्। ०७-०९-०९ दिनाङ्के संस्कृतमहोत्सवस्य समापनसमारोहः समजायत। कार्यक्रमे मुख्यातिथिरूपेण समुपस्थितः आचार्यः सि. राजेन्द्रन्महाभागः (कालिकट्-विश्वविद्यालयः) अभिप्रायं प्रकटितवान् यत् 'भाषायाः उपरिप्लवाध्ययनेन किमपि न भवति - भाषायां निहितज्ञानार्जनेनैव प्रयोजनं भविष्यति। संस्कृतवाङ्मये निहितविषयाणां गभीरमनुसन्धानं करणीयं वर्तते' इति। राष्ट्रपतिपुरस्कारेण पुरस्कृतः आचार्यः आर्.वासुदेवन्-पोट्टिमहोदयः, डा.एन्.पि. उण्णिमहोदयः (भूतपूर्वकुलपतिः, श्रीशङ्कराचार्यविश्वविद्यालयः, कालटी) च रजिन्द्रन्महोदयेन सम्मानितः। परिसरप्राचार्यः के.टि. माधवन्महोदयः अध्यक्षपदमलमकरोत्। विद्यापीठीयछात्राणां तृश्शूर्-मण्डलीय-विद्यालयच्छात्राणां च कृते आयोजितप्रतियोगितासु पुरस्कारार्हाणां पुरस्कार-प्रदानं डा. सि. राजेन्द्रन्महोदयः अकरोत्।

### छात्रकल्याणसमितिः



छात्रकल्याणसमितेः उद्घाटनावसरे भाषमाणा मुत्तुलक्ष्मीः

गुरुवायूरुपरिसरे १८-८-०९ दिनाङ्के छात्रकल्याणसमितेः उद्घाटनोत्सवः लोकसभासदस्यस्य श्री. बिजु. पि. के. महोदयस्य महनीयोपस्थितौ सम्पन्नः। भारतीयसंस्कृतेः परम्परायाश्च मूलस्रोतः वर्तते सरला मनोहरा च संस्कृतभाषेति विस्तरेणोपन्यस्तवान् श्री. बिजुमहोदयः। देवभाषां मानवभाषारूपेण परिवर्तयितुं यत्नः कर्तव्यः इति छात्रकल्याणसमित्यध्यक्षेण एन्. एस्. प्रजीष्महोदयेन छात्रा उद्बोधिताः। 'अस्मत्पूर्वजैः साक्षात्कृतानि शास्त्रणि अद्य यावत् स्वाध्यायपरम्परया संरक्षितानि। तादृशशास्त्राणां अध्ययनपरम्परायाः संरक्षणम् अस्माकं कर्तव्यम्। वैज्ञानिकक्षेत्रे संस्कृतस्य योगदानं महत् वर्तते' इति साहित्य-अकाडमी-पुरस्कारेण पुरस्कृता श्रीमती मुत्तुलक्ष्मीमहाभागा अवदत्। कूटियाट्टकलाम् अधिकृत्य, तद्द्वारा भाषायाः प्रचारश्च कथं भवति इति विषयं चाधिकृत्य स्वीयाशयम् आविष्कृतवती कालटीतः आगता कूटियाट्टविदुषी श्रीमती उषा नाङ्यार्। परिसरप्राचार्यः के. टी. माधवन् परिसरेण आयोजयितुमुद्दिष्टाः 'कृषिः संस्कृतञ्च' 'संस्कृतं पर्यावरणञ्च', 'संस्कृतिः पत्रधर्मश्च' इत्यादिपाठ्यपद्धतीः अधिकृत्य विवरणं कृतवान्।

## छात्रप्रातिभम्

- शिवमोग्गास्थायां श्री तरुणोदयसंस्थायां प्रवृत्तभाषणस्पर्धायां श्रीनागराजः, कुमारी कुमुदाराव्, श्री मल्लीकरदीपक कवनः इत्येते छात्राः प्रथम-द्वितीयादिपुरस्कारैः सभाजिताः। इयं स्पर्धा अगस्तमासे ३० दिनाङ्के संवृत्ता।
- शृङ्गेरीपरिसरस्य श्री प्रमोदभट्टः तमिलनाडुराज्यस्थ-काञ्चीपुरशङ्करमठसञ्चालितायां पारम्परिक-शास्त्रपरीक्षासरण्यां व्याकरणे द्वितीयघट्टपरीक्षायां प्रथमश्रेण्यामुत्तीर्णः। इयं परीक्षा अगस्तमासस्य ३० दिनाङ्के अभूत्।
- अगस्तमासस्य १२ दिनाङ्के संस्कृतोत्सवाङ्गतया उडुपिस्थसंस्कृतपाठशालायां प्रवृत्तासु राष्ट्रस्तरीयस्पर्धासु शृङ्गेरीपरिसरस्य श्री. प्रसन्नः जि. भट्टः (आ II) सुब्रह्मण्य भट्टः (आ I (ज्योतिषम्)) च द्वितीयपुरसरं प्राप्तवन्तौ। अगस्त-मासे १२ दिनाङ्के इमाः स्पर्धाः अभूवन्।

### आगामिनः कार्यक्रमाः

| | |
|---|---|
| राष्ट्रियसङ्गोष्ठी | ९-१०-१० २००९ 'पूर्वोत्तरराज्यानां संस्कृतं प्रति अवदानम्' इति विषये राष्ट्रियसङ्गोष्ठी गेङ्टोकनगरे। |
| स्थापनादिवसमहोत्सवः | १५, १६ अक्टोबर २००९. |
| | रा.सं.संस्थानस्य स्थापनादिवसमहोत्सवाङ्गतया १५-१०-०९ दिनाङ्के सारस्वतसपर्या। तत्र संस्थानस्य संस्थापकनिदेशकस्य आचार्य-रामकरणशर्ममहोदयस्य आध्यक्ष्ये, सम्प्राप्त-ज्ञानपीठपुरस्कारस्य आचार्यस्य सत्यव्रत-शास्त्रिवर्यस्य सम्मानः। |
| | १६-१०-०९ दिनाङ्के 'आधुनिकविश्वे वेदान्तदर्शनम्' इति विषयमधिकृत्य डा. कर्णसिंहमहोदयस्य व्याख्यानम्। संस्थान-च्छात्रैः अभिज्ञानशाकुन्तलस्य प्रस्तुतिः। |
| कौमुदीमहोत्सवः | १० तः १२.११.०९ नवदेहल्याम्। |
| युवमहोत्सवः, शलाकापरीक्षा | २७ तः ३०-११-०९ जयपुरपरिसरे। |
| अखिलभारतीयवाक्स्पर्धाः | ३०-११-०९ तः ०२-१२-०९ जयपुरपरिसरे। |

### शुद्धिसूचना

संस्कृतवार्तायाः चतुर्थे अङ्के उभयत्र एकैकं पदं लुप्तमासीत्। तदेवं संयोज्य पठेयुरिति निवेदनम्–

| पृ.सं. | पं.सं./स्थानम् | योजनीयं पदम् |
|---|---|---|
| ९ | वामतः ९ अन्तिमपदम् | निवेदितवान् |
| १५ | २ द्वितीयपदम् | सञ्चालितेषु |

### अचिरात् प्रकाशयिष्यन्ते –



१. **आत्मतत्त्वविवेकः**
उदयनाचार्यप्रणीतः, माधवझा-कृतटिप्पण्या सहितः, गोस्वामि-श्याममनोहर विरचितोपोद्घातेन आचार्यकिशोनाथझाप्रणीतपरिचयेन च संवलितः,
–सं॰ दि. आचार्यः अच्युतानन्ददाशः।

२. **संस्कृतसाहित्ये प्रबन्धविज्ञानम्** [Readings on Management in Sanskrit]
– सम्पादकः आङ्ग्लानुवादकश्च - डा. वादिराज-पञ्चमुखी।

### संस्थानस्य नवीनानि प्रकाशनानि –

- **व्यवहारमयूखः**
  - भगवन्तभास्करविरचितः, म.म. पुरुषोत्तमवामन-काणेकृतेन आङ्ग्लानुवादेन सहितः।
  –सं॰ आचार्यः राधावल्लभत्रिपाठी
- **संस्कृत-विमर्शस्य नवशृङ्खलायां द्वितीयः अङ्कः**
- **Modern Sanskrit Writings in Karnataka**
  –ले॰ डा.एस्. रङ्गनाथः
- **विद्यालयप्रशासनं सङ्घटनञ्च**
  –अनु॰ आचार्य-सन्तोषसिंहमित्तलः,
  आचार्यः फतेहसिंहः
- **धर्मसूरिविरचितो नरकासुरविजयव्यायोगः**
  –डा॰ शर्मिला बागची
- श्रीराधावल्लभीयमतप्रकाशकं **ब्रह्मसूत्रभाष्यम्**
  (श्रीमद्विश्वनाथसिंहजूदेवविरचितम्)
  –सं॰ आचार्यः मिथिलाप्रसादत्रिपाठी
- **उदयनाचार्यप्रणीतः न्यायकुसुमाञ्जलिः**
  (हरिहरकृपालुद्विवेदिकृतटीकया सहितः)
  –सं॰ आचार्यः वाचस्पतिद्विवेदी

२३-७-०९ दिनाङ्के संस्थानमुख्यालये अनौ.सं.शिक्षणस्य प्रान्तसंयोजकानाम् उपवेशनमेकं कुलपतिमहोदयस्याध्यक्षतायां सम्पन्नम्। उपवेशनान्ते नूतनप्रान्तसंयोजकानां नामानि प्रकटितानि आसन्।

## अनौपचारिकसंस्कृतशिक्षणस्य नूतनप्रान्तसंयोजकाः

**१. केरलराज्ये**
डा. सुब्रह्मण्यशर्मा, अद्वैतवेदान्तविभागः
रा.सं.सं. गुरुवायूरु-परिसरः, पो. - पुनराटुक्करा,
त्रिचूर - ६८० ५५१ (केरलम्)
दूरभाषा : (०४७८) २३०७६०८ मो. : ०९४४७८५९३४०

**२. कर्णाटकराज्ये**
प्रो. ए.पी.सच्चिदानन्दः
रा.सं. संस्थानम् राजीवगान्धीपरिसरः, शृङ्गेरी - ५७७ १३९
जिला - चिकमङ्गलूर (कर्नाटकम्)
मो. : ०९४४९१६०८९१ दूरभाषा : (०८२६५) २५०८९२ (आ.)

**३. तमिलनाडुप्रान्ते-**
डा. आर्. रामचन्द्रन्
व्याख्याता, संस्कृतविभागः रामकृष्णामिशन्,
विवेकानन्द-कॉलेज, मैलापुर, मद्रास - ०४ (तमिलनाडु)
मोबाईल : ०९४४४०७९९५८

**४. आन्ध्रप्रदेशे-**
डा. श्रीनिवासवरखेडी
निदेशकः, संस्कृतपरिषत्, उस्मानियाविश्वविद्यालयः
हैदराबाद - ५०० ००७ (आ.प्र.) मोबाईल : ०९४९००६१७४१

**५. महाराष्ट्रे ( विदर्भक्षेत्रे )-**
प्रो. पङ्कजचान्दे, कुलपतिः
कविकुलगुरुकालिदाससंस्कृतविश्वविद्यालयः,
रामटेक, जिला-नागपुर (महाराष्ट्र)
दूरभाषा : (०७१२) २५६०९९२ मो : ०९८९०३०३८०३

**६. महाराष्ट्रे-**
प्रो. रवीन्द्र-अम्बादासमुले संस्कृतविभागः
पुणेविश्वविद्यालयः, गणेशखिन्ड रोड,
पुणे - ४११ ००५ (महाराष्ट्रम्) - ०९८६०९४१००६

**७. गुजराते-**
डा. रामप्रियः, प्राचार्यः
दर्शनम्-संस्कृतमहाविद्यालयः,
सरखेज्-गान्धीनगरहैवे, पो. चान्द्लोदिया, जिला-अहमदाबाद्,
छारोडी, (गुजरात) पिन - ३८२ ४८१
मोबाईल : ०९८२५१३०७६८ : ०२७१७-२४२१४१-२

**८. राजस्थाने-**
डा. पूर्णचन्द्र-उपाध्यायः
अध्यक्षः, संस्कृतविभागः, राजकीयविडलामहाविद्यालयः,
भवानीमंडी (राजस्थानम्), मोबाईल : ०९४१४४८९७२३

**९. मध्यप्रदेशे-**
प्रो. पी.एन्.शास्त्री
शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
भोपाल-परिसरः, ई-७/६२, अरेरा कॉलोनी, नजदीक सैन बोर्ड,
भोपालम् - ४६२ ०१६ (मध्यप्रदेशः) ९४२५६८२२७१

**१०. हरियाणाप्रदेशे-**
आचार्यः सुरेन्द्रमोहनमिश्रः
संस्कृतविभागः, कुरुक्षेत्रविश्वविद्यालयः,
कुरुक्षेत्रम् - १३६ ११९ (हरियाणा) मोबाईल : ०९८९६०८६५७९

**११. पञ्जाबे-**
डा. इन्द्रमोहनसिंहः
संस्कृतविभागः, पञ्जाबविश्वविद्यालयः, पटियाला
मोबाईल : ०९८१५९६६२८७

**१२. हिमाचलप्रदेशे-**
डा. भक्तवत्सलशर्मा, प्राचार्यः
सनातनधर्म-आदर्शसंस्कृतमहाविद्यालयः,
डोहगी, ऊना, हिमाचलप्रदेशः - १७४ ३०७
दूरभाषा : ०१९७५-२६२०३७ मोबाईल : ०९४१८०९४२९३

**१३. जम्मू-कश्मीरे-**
प्रो. विश्वमूर्तिशास्त्री, प्राचार्यः
श्रीरणवीरपरिसरः, कोट भलवाल, जम्मू - १८१ १२२ (जम्मू व कश्मीर)
दूरभाषा : (०१९१) २६२३०९०

**१४. देहल्याम्-**
डा. हरिराममिश्रः
विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली
मोबाईल : ०९९७११८७२८४

**१५. उत्तराञ्चले-**
डा. बुद्धदेवशर्मा, सचिवः संस्कृतपरिषत्, (उत्तराञ्चल संस्कृत अकादमी)
रानीपुर झाल, नेशनल हाइवे, मोबाइल : ०९४११११११८५

**१६. उत्तरप्रदेशे-**
डा. लक्ष्मीनिवासपाण्डेयः
प्रवाचकः, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थाम्, लखनऊ-परिसरः, विशालखण्डनम् - ४,
गोमतीनगरम्, लखनऊ - २२६ ०१० (उत्तरप्रदेशः) मोबाईल : ०९३३५२७७९२३

**१७. बिहारे-**
डा. श्रीप्रकाशपाण्डेयः
व्याख्याता बी.आर्. अम्बेडकर-विश्वविद्यालयः,
क्वा.नं.- २३, विश्वविद्यालयपरिसरः, मुजफ्फरपुरम् - ०१ (बिहारः)
मोबाइल : ०९४३००१३७१९

**१८. पश्चिमबङ्गाले-**
श्री तन्मयकुमारभट्टाचार्यः
ए.एफ्.-१५९, रवीन्द्रपल्ली, पत्रालयः - प्रफुल्लकाननम्,
कृष्णापुरम्, कोलकाता - ७०० १०१
लखनऊ-परिसरः, विशालखण्डनम् - ४,
दूरवाणी : (०३३) २५७१०२५७ मोबाईल : ०९४३३८३२०७५

**१९. ओडिसाप्रान्ते-**
डा. सुकान्तकुमारसेनापतिः
राष्ट्रियसंस्कृतसंस्थानम्, श्रीसदाशिवपरिसरः, पुरी - ७५२ ००१ (उड़ीसा)
मोबाईल : ०९९३७४२७०९४

**२०. आसामे ( पूर्वोत्तरक्षेत्रे )-**
प्रो. दीपककुमारशर्मा
संस्कृतविभागः, गुवाहाटी-विश्वविद्यालयः, गुवाहाटी (असम)
मोबाईल : ०९४३५१०८६३३ (R) ०९४३५१४२३७४ (O)

Samskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.II No.5 Pub. by the Registrar for Rashtriya Sanrkrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007